# ॥ सुवर्णप्रभासोत्तमसूत्रेन्द्रराजः ॥

## ॥ निदानपरिवर्तः ॥

ॐ नमः श्रीसर्वबुद्धबोधिसत्त्वेभ्यः।
ॐ नमः श्रीभगवत्यै आर्यप्रज्ञापारमितायै ॥ तद्यथा।
ॐ श्रुतिस्मृतिगतिविजये स्वाहा ॥
यस्मिन् पारमिता दशोत्तमगुणास्तैस्तैर्नयैः सूचिताः
सर्वज्ञेन जगद्धिताय दश च प्रख्यापिता भूमयः।
उच्छेदध्रुववर्जिता च विमला प्रोक्ता गतिर्मध्यमा
तत्सूत्रं स्वर्णप्रभानिगदितं शृण्वन्तु बोध्यर्थिनः ॥
श्रुतं मयैकसमये गृध्रकूटे तथागतः ॥
विजहार धर्मधातौ गम्भीरे बुद्धगोचरे ॥ १ ॥

बोधिसत्त्वसमुच्चयया महाकुलदेवताया, सरस्वत्या च महादेवतया, श्रिया च महादेवतया, दृढया च महापृथिवीदेवतया, हारीत्य च महादेवतया, एवं प्रमुखाभिर्महादेवताभिरनेकदेवनागयक्षराक्षसगन्धर्वासुरगरुडकिन्नरमहोरगमनुष्यामनुष्यैः सार्धम्। अथायुष्मानान्दो भगवन्तमेतदवोचत्। किं तासां भगवन्धर्मविनयं भविष्यतीति ?

भगवानाह गाथाभिः। भावनं च न दुःपृच्छया विरजस्कं समाधिं धर्मसारं प्रतिष्ठितम्।

शुद्धेषु विरजस्केषु बोधिसत्त्वोत्तमेषु च।
निदानं सूत्रराजेन्द्रं स्वर्णप्रभासोत्तममिदम्॥ २ ॥

ततो गम्भीरश्रवणेन गम्भीरव्युपपरीक्षणेन।
दिक्षु चतसृषु बुद्धैरधिष्ठानमधिष्ठितम्॥ ३ ॥

अक्षोभ्यराजः पूर्वस्मिन्दक्षिणे रत्नकेतुना।
पश्चिमायाममिताभ उत्तरे दुन्दुभिस्वरः॥ ४ ॥

तं प्रवक्ष्याम्यधिष्ठानं माङ्गल्यदेशनोत्तमम् ।
सर्वपापविनाशार्थं सर्वपापक्षयंकरम् ॥ ५ ॥

सर्वसौख्यप्रदातारं सर्वदुःखविनाशनम् ।
मूलं सर्वज्ञतत्त्वस्य सर्वश्रीसमलङ्कृतम् ॥ ६ ॥

उपहतेन्द्रिया ये हि सत्त्वा नष्टा हतायुषः ।
अलक्ष्म्या परिविष्टा हि देवतासु पराङ्मुखाः ॥ ७ ॥

कान्तया ते जना द्विष्टाः कुटुम्बादिष्वपद्रुताः ।
परस्परविरुद्धा वा अर्थनाशैरुपद्रुताः ॥ ८ ॥

शोकायासेष्वनर्थे च भये व्यसन एव च ।
ग्रहनक्षत्रपीडायां काखोर्दग्दारुणग्रहैः ॥ ९ ॥

पापकं पश्यति स्वप्नं शोकायाससमुच्छ्रितम् ।
तेन च स्नानशुचिना श्रोतव्यं सूत्रमुत्तमम् ॥ १० ॥

शृण्वन्ति य इदं सूत्रं गम्भीरं बुद्धगोचरम् ।
प्रसन्नचित्ताः सुमनसः शुचिवस्त्रैरलङ्कृताः ॥ ११ ॥

तेषां सर्वे तथा नित्यमुपसर्गाः सुदारुणाः ।
तेजसा चास्य सूत्रस्य शाम्यन्ते सर्वप्राणिनाम् ॥ १२ ॥

स्वयं ते लोकपालाश्च सामात्याः सगणेश्वराः ।
तेषां रक्षां करिष्यन्ति ह्यनेकैर्यक्षकोटिभिः ॥ १३ ॥

सरस्वती महादेवी तथा नैरञ्जनवासिनी ।
हारीती भूतमाता च दृढा पृथिवीदेवता ॥ १४ ॥

ब्रह्मेन्द्रैस्त्रिदशेन्द्रैश्च महर्द्धिकिन्नरेश्वरैः ।
गरुडेन्द्रैस्तथा सार्धं यक्षगन्धर्वपन्नगैः ॥ १५ ॥

ते च तत्रोपसंक्रम्य ससैन्यबलवाहनाः ।
तेषां रक्षां करिष्यन्ति दिवारात्रौ समाहिताः ॥ १६ ॥

इदं सूत्रं प्रकाशिष्ये गम्भीरं बुद्धगोचरम् ।
रहस्यं सर्वबुद्धानां दुर्लभं कल्पकोटिभिः ॥ १७ ॥

शृण्वन्ति य इदं सूत्रं ये चान्ये श्रावयन्ति च ।
ये केचिदनुमोदन्ते ये च पूजां करोन्ति हि ॥ १८ ॥

ते पूजिता भविष्यन्ति ह्यनेकैः कल्पकोटिभिः ।
देवनागमनुष्यैश्च किन्नरासुरगुह्यकैः ॥ १९ ॥

पुण्यस्कन्धमपर्यन्तमसंख्येयमचिन्तितम् ।
यत्तेषां प्रसृतं भोति कृतपुण्यान प्राणिनाम् ॥ २० ॥

प्रगृहीता भविष्यन्ति सर्वबुद्धैर्दिशो दश ।
गम्भीरचरितेभिश्च बोधिसत्त्वैस्तथैव च ॥ २१ ॥

चौक्षचीवरप्रावृत्य सुगन्धजलपावनैः ।
मैत्रीचित्तं समुत्थाप्य पूजितव्यमतन्द्रितैः ॥ २२ ॥

विपुलं विमलं चित्तमात्मानं प्रकरिष्यति ।
प्रसादयंश्च चेतांसि शृणुध्वं सूत्रमुत्तमम् ॥ २३ ॥

स्वागतं च मनुष्येषु सुलब्धं मनुषं फलम् ।
सुजीविताश्च जीवन्ति सूत्रं शृण्वन्ति ये त्विदम् ॥ २४ ॥

उप्तकुशलमूलास्ते बहुबुद्धप्रकाशिताः ।
येषामिदं कर्णपुटे देशितं संप्रविश्यतीति ॥ २५ ॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे
निदानपरिवर्त्तो नाम प्रथमः ॥

# ॥ तथागतायुःप्रमाणनिर्देशपरिवर्तः ॥

तेन खलु पुनः कालेन तेन समयेन राजगृहे महानगरे रुचिरकेतुर्नाम बोधिसत्त्वो महासत्त्वः प्रतिवसति पूर्वजिनकृताधिकारोऽवरोपितकुशलमूलो बहुबुद्धकोटिनियुतशतसहस्रपर्युपासितः। तस्यै-तदभवत्, को हेतु कः प्रत्ययो यद्भगवतः शाक्यमुनेरेवं परीत्तमायुः प्रमाणं यदुताशीतिवर्षाणीति।

पुनस्तस्यैतदभवत्, उक्तं चैव भगवता द्वौ हेतू द्वौ च प्रत्ययौ दीर्घायुष्कतायाम्। कतमौ द्वौ प्राणातिपातविरमणं भोजनप्रदानं च। अथ बहुन्यसंख्येयकल्पकोटिनियुतशतसहस्राणि भगवाञ्छाक्य-मुनिः प्राणातिपातविरतो बभूव। यावद्दशकुशलकर्मपथं समादापयेत्, तावद्भगवता भोजनमाध्यात्मिकं बाह्यानि च वस्तूनि सत्त्वानां परित्यक्तानि। अन्तशः स्वशरीरमांसरुधिरास्थिमज्जया बुभुक्षिताः सत्त्वाः संतर्पिताः प्रागेवान्येन भोजनेन।

अथ तस्य पुरुषस्य बुद्धानुस्मृतिमनसिकारस्येमामेवंरूपां चिन्तां चिन्तयमानस्य गृहं विपुलं विस्तीर्णं संप्रवृत्तमभवत्। वैडूर्यमयमनेकदिव्यरत्नप्रत्युप्तं तथागतविग्रहं दिव्यातिक्रान्तेन गन्धेन स्फुटम्। तस्मिंश्च गृहे चतुर्दिशि चत्वारि दिव्यरत्नमयान्यासनानि प्रादुर्भुतान्यभूवन्। तेषु चासनेषु दिव्यानि पर्यङ्कानि दिव्यरत्नपुष्पपत्रैः प्रज्ञप्तानि प्रादुर्भूतानि बभूवः। तेषु पर्यङ्केषु दिव्यान्यनेकरत्न-प्रत्युप्तानि तथागतविग्रहाणि पद्मानि प्रादुर्भूतानि। तेषु च पद्मेषु चत्वारो बुद्धा भगवन्तः प्रादुर्भूताः बभुवुः। पुरान्तिकेन त्वक्षोभ्यस्तथागतः प्रादुर्भूतो दक्षिणेन रत्नकेतुस्तथागतः प्रादुर्भूतः पश्चिमेनामिता-युस्तथागतः प्रादुर्भूत उत्तरेण दुन्दुभिस्वरस्तथागतः प्रादुर्भूतः। समनन्तरप्रादुर्भूताश्च ते बुद्धा भगवन्तस्तेषु सिंहासनेषु।

अथ तावदेव राजगृहं महानगरं महतावभासेनावभासितं स्फुटं बभूव। यावत्त्रिसाहस्रमहासाहस्र-लोकधातुर्यावत्समन्ताद्दशसु दिक्षु गङ्गानदीवालुकासमा लोकधातवस्तेनावभासेन स्फुटा बभूवः। दिव्यानि च पुष्पाणि प्रावर्षुर्दिव्यानि च तूर्याणि प्रवादयामासुः। सर्वे चास्मिंस्त्रिसाहस्रमहासाहस्र-लोकधातौ सत्त्वा बुद्धानुभावेन दिव्यसुखेन समन्वागता बभूवुः। जात्यन्धाश्च सत्त्वा रूपाणि पश्यन्ति स्म। वधिराश्च सत्त्वाः सत्त्वेभ्यः शब्दानि शृण्वन्ति। उन्मत्ताश्च सत्त्वाः स्मृतिं प्रतिलभन्तेऽविक्षिप्त-चित्ताश्च स्मृतिमन्तो बभूवुः। नग्नाश्च सत्त्वाश्चीवरप्रावृता बभूवुः। जिघत्सिताश्च सत्त्वाः परिपूर्णगात्रा बभूवुः। तृषिताश्च सत्त्वा विगततृष्णा बभूवः। रोगस्पृष्टाश्च सत्त्वा विगतरोगा बभूवुः। हीनकायाश्च सत्त्वाः परिपूर्णेन्द्रिया बभूवुः। विस्तरेण बहूनामाश्चर्याद्भुतधर्माणां लोके प्रादुर्भावोऽभूत्।

अथ खलु रुचिरकेतुर्बोधिसत्त्वो महासत्त्वस्तान्बुद्धान्भगवतो दृष्ट्वाश्चर्यप्राप्तो बभूव। कथमेतदिति सन्तुष्ट उदग्र आत्तमनाः प्रमुदितः प्रीतिसौमनस्यजातो येन ते बुद्धा भगवन्तस्तेनाञ्जालिं प्रणाम्यकार-तस्तान्बुद्धान्भगवतोऽनुस्मरमाणो भगवतः शाक्यमुनेर्गुणाननुस्मरमाणो भगवतः शाक्यमुनेरायुःप्रमाण-संशयप्राप्तस्तां चिन्तां चिन्तयमानः स्थितो बभुव। कथमेतत् किमेतद् यद्भगवतः शाक्यमुनेरेवं परीत्त-मायुःप्रमाणं यदुताशीति वर्षाणि।

अथ खलु ते बुद्धा भगवन्तः स्मृताः संप्रजानास्तं रुचिरकेतुं बोधिसत्त्वमेतदवोचन्। मा त्वं कुलपुत्रैवं चिन्तय एवं परीत्तं भगवतः शाक्यमुनेरायुःप्रमाणम्। तत्कस्य हेतोः। न च वै कुलपुत्र तं समनुपश्यामः सदेवके लोके समारके सब्रह्मके सश्रमणब्राह्मणिकायां प्रजायां सदेवमानुषासुरायां यः समर्थः स्याद्भगवतः शाक्यमुनेस्तथागतस्यायुःप्रमाणपर्यन्तमधिगन्तुं यावदपरान्तकोटिभिः स्थापयित्वा तथागतैरर्हद्भिः सम्यक्सम्बुद्धैः। समनन्तरोदाहृते तैर्बुद्धैर्भगवद्भिस्तथागतायुःप्रमाणनिर्देशे।

अथ तावद्बुद्धानुभावेन कामावचरा रूपावचराश्च देवपुत्राः संनिपतिता यावन्नागयक्षगन्धर्वासुर-गरुडकिन्नरमहोरगा अनेकानि च बोधिसत्त्वकोटिनियुतशतसहस्राणि तस्मिन् रुचिरकेतुबोधिसत्त्वस्य गृहे समागता आसन्। अथ ते तथागताः सर्वपर्षदो भगवतः शाक्यमुनेरायुःप्रमाणनिर्देशं गाथा-भिरभ्यभाषन्।

जलार्णवेषु सर्वेषु शक्यन्ते बिन्दुभिर्गणयितुम्।
न तु शाक्यमुनेरायुः शक्यं गणयितुं क्वचित्॥ १॥

सुमेरुं परमाणवः कृत्वा शक्यं च संख्यया।
न तु शाक्यमुनेरायुः शक्यं गणयितुं क्वचित्॥ २॥

याः काश्चित् पृथिवीः सन्ति यावन्तः परमाणवः।
शक्यं गणयितुं सर्वा न तु चायुर्हिनस्य वै॥ ३॥

आकाशं यदि वा कश्चिदिच्छेत्प्रमितुं केनचित्।
न तु शाक्यमुनेरायुः शक्यं गणयितुं क्वचित्॥ ४॥

इत्युक्तानि च क्लपानि कल्पकोटीशतानि च।
एष तिष्ठेच्च संबुद्धः संख्यातो न हि लभ्यते॥ ५॥

यस्माद् द्वे कारणे तस्य तथैव द्वौ च प्रत्ययौ।
चिरतः परहिंसाया बहु दत्तं च भोजनम्॥ ६॥

ओस्मात्तस्य महात्मस्य ह्यायुःसंख्या न लभ्यते।
इत्युक्तानि च कल्पानि संख्यायां न तथैव च॥ ७॥

तस्मान्न संशयो भो हि मा किञ्चित् कुरु संशयम्।
न जिनस्यायुःपर्यन्तं काचित्संख्योपलभ्यते॥ ८॥

अथ खलु तस्मिन्समये तत्र पर्षद्याचार्यव्याकरणप्राप्तः कौण्डिन्यो नाम ब्राम्हणोऽनेकैर्ब्राम्हण-सहस्रैः सार्धं भगवतः पूजाकर्म कृत्वा तथागवस्य महापरिनिर्वाणशब्दं श्रुत्वा सहसोत्थाय भगवत-श्चरणयोर्निपत्य भगवन्तमेवमाह। सचेत्किल भगवन्सर्वसत्त्वानुकम्पको महाकारुणिको हितैषी सर्व-सत्त्वानां मातापितृभूतोऽसमसमभूतश्चन्द्रभूत आलोककरो महाप्रज्ञाज्ञानसूर्यसमुम्दतः। यदि त्वं सर्व-सत्त्वान् राहुलः स्वं संपश्यसि मह्यमेकं वरं देहि। भगवांस्तूष्णीम्भूतोऽभूत्।

अथ बुद्धानुभावेन तस्यां पर्षदि सर्वसत्त्वप्रियदर्शनो नाम लित्सविकुमारः। तस्य प्रतिभान-मुत्पन्नम्। स आचार्यव्याकरणप्राप्तं कौण्डिन्यं ब्राम्हणमेवमाह। किं नु त्वं महाब्राम्हण भगवन्तमेकं वरं याचसे। अहं ते वरं ददामि। ब्राम्हण आह। अहमस्मिँल्लित्सविकुमार भगवतः पूजोपस्थानाय भगवतः सर्षपफलमात्रं धातुमिच्छामि निक्षेपितुं चूर्णं धातुमभिप्रयोजनायैनं सर्षपफलमात्रं धातुम-भुपूजयित्वा त्रिदशाधिपत्यं लभ्यत इत्येवं श्रूयते। शृणु त्वं लित्सविकुमार सुवर्णप्रभासोत्तमसूत्रं दुर्विज्ञेयं सर्वश्रावकप्रत्येकबुद्धानां तदृशौर्लक्षणगुणैः समन्वागतं किल सुवर्णप्रभासोत्तमसूत्रं भाव-यिष्यति। एवं भो लित्सविकुमार दुर्विज्ञेयं दुरनुबोध सुवर्णप्रभासोत्तमसूत्रम्। अस्माकमेव प्रत्यन्त-द्वीपिकानां ब्राम्हणानां सर्षपफलमात्रं धातुं करण्डके निक्षिप्य धारणमुचितम्। अहं ते वरं यचे येन सत्त्वाः क्षिप्रमेव त्रिदशाधिपत्यं प्रतिलम्भिनो भविष्यन्ति। त्वं किल भो लित्सविकुमार सर्षपफलमात्रं धातुं तथागतस्य याचितुम्। धातुं रत्नकरण्डके निक्षिप्य धारणात् सर्वसत्त्वानां त्रिदशाधिपत्येश्वरलाभ इतीच्छसे। एवं मया च लित्सविकुमार इष्टं वरम्।

अथ सर्वसत्त्वप्रियदर्शनो नाम लित्सविकुमार आचार्यव्याकरणप्राप्तं कौण्डिन्यब्राम्हणं गाथा-भिरभ्यभाषत।

यदा स्रोतःसु गङ्गाया रोहेयुः कुमुदानि च।
रक्ताः काका भविष्यन्ति शङ्खवर्णाश्च कोकिलाः॥ ९॥

जम्बुस्तालफलं दद्यात् खर्जूरश्चाम्रमञ्जरीम्।
तदा सर्षपमात्रं च व्यक्तं धातुर्भविष्यति ॥ १० ॥

यदा कच्छपलोमानां प्रावारैः सुवृतो भवेत्।
हेमन्ते शीतहरणो तदा धातुर्भविष्यति ॥ ११ ॥

यदा मशकपादानामट्टकालम्बनं भवेत्।
दृढं चाप्यप्रकम्पि च तदा धातुर्भविष्यति ॥ १२ ॥

यदा तीक्ष्णा महान्तश्च दन्ता जायन्ति पाण्डुराः।
जलैकानां हि सर्वेषां तदा धातुर्भविष्यति ॥ १३ ॥

यदा शशविषाणेन निःश्रेणी सुदृढा भवेत्।
स्वर्गस्यारोहणार्थाय तदा धातुभविष्यति ॥ १४ ॥

तां निश्रेणी यदारुह्य चन्द्रं भक्षति मूषिकः।
राहुं च परिधावेत तदा धातुर्भविष्यति ॥ १५ ॥

यदा मद्यघटं पीत्वा मक्षिका ग्रामचारिण्यः।
अगारे वासं कल्पेयुस्तदा धातुर्भविष्यति ॥ १६ ॥

यदा बिम्बोष्ठसम्पन्नो गर्दभः सुखितो भवेत्।
कुशलं नृत्यगीतेषु तदा धातुर्भविष्यति ॥ १७ ॥

यदा ह्युलूककाकाश्च रमयेयुः सहागताः।
अन्योन्यमनुकूलेन तदा धातुर्भविष्यति ॥ १८ ॥

यदा पलाशपत्राणां छत्रं हि विपुलं भवेत्।
वर्षस्य प्रतिपाताय तदा धातुर्भविष्यति ॥ १९ ॥

यदा सामुद्रिका नावः सयन्त्राः सपताकिकाः ।
स्थलमारुह्य गच्छेयुस्तदा धातुर्भविष्यति ॥ २० ॥

यदा ह्युलूकशकुनाः पर्वतं गन्धमादनम् ।
तुण्डेनादाय गच्छेयुस्तदा धातुर्भविष्यति ॥ २१ ॥

एताश्च गाथाः श्रुत्वाचार्यव्याकरणप्राप्तं कण्डिन्यु ब्राम्हणः सर्वलोकप्रियदर्शनं लित्सविकुमारं गाथाभिः प्रत्यभाषत ।

साधु साधु कुमाराग्र जिनपुत्र महागिर ।
उपायकुशलो वीरः प्राप्तव्याकरणोत्तमः ॥ २२ ॥

मम कुमार शृणोहि लोकनाथस्य तायिनः ।
तथागतस्य माहात्म्यं यथाक्रममचिन्तितम् ॥ २३ ॥

अचिन्त्यं बुद्धविषयमसमाश्च तथागताः ॥
सर्वबुद्धाः शिवा नित्यं सर्वबुद्धाः समाचारः ॥ २४ ॥

सर्वबुद्धाः समवणा एषा बुद्धेषु धर्मता ।
न कृत्रिमोऽसौ भगवान्नोत्पन्नश्च तथागतः ॥ २५ ॥

वज्रसंहननकायो निर्मितकायदर्शकः ।
नापि सर्षपमात्रं च धातुर्नाम महर्षिणाम् ॥ २६ ॥

अनस्थिरुधिरे काये कुतो धातुर्भविष्यति ।
उपायधातुनिक्षेपः सत्त्वानां हितकारणम् ॥ २७ ॥

धर्मकायो हि सम्बुद्धो धर्मधातुस्तथागतः ।
इदृशों भगवत्काय ईदृशी धर्मदेशना ॥ २८ ॥

एतच्छ्रुतं मया ज्ञात्वाभियाचितं वरं मया।
तत्त्वव्याकरणार्थाय वर्ओत्पादं मुनेः कृतम्॥ २९॥

अथ खलु द्वात्रिंशद्देवपुत्रसहस्राणि तथागतस्य यं गम्भीरमायुःप्रमाणनिर्देशं श्रुत्वा सर्वैरनुत्तरायां सम्यक्सम्बोधौ चित्तान्युत्पाबितानि ते प्रहृष्टमनःसंकल्पा एकस्वरनिर्घोषेण गाथामभाषन्।

न बुद्धः परिनिर्वाति न धर्म परिहीयते।
सत्त्वानां परिपाकाय परिनिर्वाणं निदर्शयेत्॥ ३०॥
अचिन्त्यो भगवान्बुद्धो नुत्यकायस्तथागताः।
देशेति विविधान्व्यूहान्सत्त्वानां हितकारणात्॥ ३१॥

अथ खलु रुचिरकेतुर्बोधिसत्त्वस्तेषां बुद्धानां भगवतां तयोश्च द्वयोः सत्पुरुषयोरन्तिकाभ्दगवतः शाक्यमुनेरायुःप्रमाणनिर्देशं श्रुत्वा तुष्ट उदग्र आत्तमनाः प्रमुदितः प्रीतीसौमनस्यजातश्चोदारेण प्रीति-प्रामोद्येन स्फुटोऽभूत्। अस्मिंस्तथागतायुःप्रमाणनिर्देशे निर्दिश्यमानेऽप्रमेयाणामसंख्येयानां सत्त्वा-नामनुत्तरायां सम्यक्संबोधौ चित्तमुत्पाबितम्। ते च तथागता अन्तरिता इति।

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे तथागतायुःप्रमाण-
निर्देशपरिवर्तो नाम द्वितीयः॥

## ॥ स्वप्नपरिवर्तः ॥

अथ खलु रुचिरकेतुर्नाम बोधिसत्त्वः स्वुप्तः स्वप्नान्तरगतः सुवर्णां सुवर्णमयीं भेरीमद्राक्षीत्। समन्तादवभासमानां तद्यथापि नाम सूर्यमण्डलं सर्वासु दिक्ष्वप्रमेयानसंख्येयान्बुद्धानद्राक्षीद्रत्नवृक्षमूले सिंहासने वैडूर्यमये प्रतिनिषण्णाननेकशतसहस्रिकायां परिषदायां परिवृतायां पुरस्कृतायां धर्मदेशयमानान्। तत्र च ब्राह्मणरूपेण पुरुषमद्राक्षीत् तां भेरीं पराहन्तम्। तत्र भेरीशब्दादिमामेवंरूपां गाथां निश्चरमाणामश्रौषीत्।

अथ खलु रुचिरकेतुर्बोधिसत्त्वः प्रतिविबुद्धः समनन्तरं तां धर्मदेशनागाथामनुस्मरति स्म। अनुस्मरमाणस्तस्या रात्र्या अत्ययेन राजगृहान्महानगरान्निष्क्रम्यानेकैः प्राणिसहस्रैः सार्धं येन गृध्रकूटः पर्वतराजो येन भगवांस्तेनोपसंक्रान्त उपसंक्रम्य भगवतः पादौ शिरसा वन्दित्वा भगवन्तं त्रिप्रदक्षिणीकृत्यैकान्ते न्यषीदत्।

अथ खलु रुचिरकेतुर्बोधिसत्त्वो येन भगवांस्तेनाञ्जलिं प्रणम्य याश्चैव ताः स्वप्नान्तरे दुन्दुभिशब्देन देशनागाथाः श्रुतास्ता उवाच।

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे
स्वप्नपरिवर्तो नाम तृतीयः॥

## ॥ देशनापरिवर्तः ॥

एकरात्रमतन्द्रेण स्वप्नान्तरगतं मया ।
दुन्दुभी रुचिरा दृष्टा समन्तकनकप्रभा ॥ १ ॥

ज्वलमानं यथा सूर्यं समन्तेन विरोचितम् ।
प्रभासिता दश दिशो दृष्टा बुद्धाः समन्ततः ॥ २ ॥

निषण्णा रत्नवृक्षेषु वैडूर्ये च प्रभास्वरे ।
अनेकशतसाहस्र्या परिषदा प्रभास्कृताः ॥ ३ ॥

दृष्टा ब्राह्मणरूपेण पराहन्यन्ती दुन्दुभी ।
तेनास्यास्ताड्यमानाया इमे श्लोका अभिश्रुताः ॥ ४ ॥

सुवर्णप्रभासोत्तमदुन्दुभेन
शाम्यन्तु दुःखा त्रिसहस्रलोके ।
अपायदुःखा  यमलोकदुःखा
दारिद्र्यदुःखानि तथैव लोके ॥ ५ ॥

अनेन चो दुन्दुभिशब्दनादिना
शाम्यन्तु सर्वव्यसनानि लोके ।
समन्तसत्त्वा हृदयाहता तथा
तथाभया शान्तभया मुनीन्द्र ॥ ६ ॥

यथैव सर्वार्यगुणोपपन्नः
संसारसर्वज्ञमहामुनीन्द्रः ।
तथैव भोन्तु गुणसागराः प्रजाः
समाधिबोध्यङ्गगुणैरुपेताः ॥ ७ ॥

अनेन चो दुन्दुभिघोषनादिना
भवन्तु ब्रह्मस्वर सर्वसत्त्वाः ।

स्पृशन्तु बुद्धत्ववराङ्गबोधिं
प्रवर्तयन्तू शुभधर्मचक्रम् ॥ ८ ॥

तिष्ठन्तु कल्पानि अचिन्तियानि
देशेन्तु धर्मं जगतो हिताय।
हनन्तु क्लेशान्विधमन्तु दुःखां
शमेन्तु रागं तथ दोषमोहम् ॥ ९ ॥

ये सत्त्व तिष्ठिन्ति अपायभूमौ
आदीप्तसंप्रज्वलिताग्निगात्राः।
शृण्वन्तु ते दुन्दुभिसंप्रवादितां
नमोऽस्तु बुद्धाय वचो लभन्तु ॥ १० ॥

जातिस्मराः सत्त्व भवन्तु सर्वे
जातीशता जातिसहस्रकोटचः।
अनुस्मरन्तः सततं मुनीन्द्रं
शृण्वन्तु तेषां वचनं ह्युदारम् ॥ ११ ॥

अनेन चो दुन्दिभि घोषनादिना
लभन्तु बुद्धेहि सदा समागमम्।
विवर्जयन्तू खलु पापकर्म
चरन्तु कुशलानि शुभक्रियाणि ॥ १२ ॥

नरासुराणामपि सर्वप्राणीनां
याचन्तु तां देशनप्रार्थनाय।
अनेन चो दुन्दुभिघोषनादिना
तत्सर्वि तेषां परिपूरयेयम् ॥ १३ ॥

ये घोरनरके उपपन्नसत्त्वा
आदीप्तसंप्रज्वलिताग्निगात्राः।

निस्तीर्णशोकाश्च परिभ्रमन्ति
निर्वापणं भेष्यति तेषु चामुना ॥ १४ ॥

ये दुःखसत्त्वाः सुदारुणार्श्च
घोरा नरकेषु प्रेतेषु मनुष्यलोके ।
अनेन च दुन्दुभिघोषनादिना
सर्वे च तेषां प्रशमन्तु दुःखाः ॥ १५ ॥

निस्त्राणमपरित्राणमशरण्यं कृतानि च ।
त्राता तेषां भवेयं च शरण्यः शरणोत्तमः ॥ १६ ॥

समन्वाहरन्तु मां बुद्धां कृपाकारुण्यचेतसः ।
अत्ययं प्रतिगृह्णन्तु दशदिक्षु व्यवस्थिताः ॥ १७ ॥

यच्च मे पापकं कर्म कृतपूर्वं सुदारुणम् ।
तत्सर्वं देशयिष्यामि स्थितो दशबलाग्रतः ॥ १८ ॥

मातापितॄनवजानन्ता बुद्धानामप्रजानता ।
कुशलं चाप्रजानन्ता यत्तु पापं कृतं मया ॥ १९ ॥

एश्वर्यमदमत्तेन कुलरूपमदेन च ।
तारुण्यमदमत्तेन यत्तु पापं कृतं मया ॥ २० ॥

दुश्चिन्तितं दरुक्तं च दुष्कृतेनापि कर्मणा ।
अनादीनवदृष्टेन यत्तु पापं कृतं मया ॥ २१ ॥

बालबुद्धिप्रचारेण अज्ञानावृतचेतसा ।
पापमित्रवशाच्चैव क्लेशव्याकुलचेतसा ॥ २२ ॥

क्रीडारतिशाच्चैव शोकरोगवशेन च ।
अतृप्तधनदोषेण यत्तु पापं कृतं मया ॥ २३ ॥

अनार्यजनसंसर्गादीर्ष्यामात्सर्यहेतुना ।
शाठ्यदारिद्रदोषेण यत्तु पापं कृतं मया ॥ २४ ॥

व्यसनागमकालेऽस्मिन्कामानां भयहेतुना ।
अनैश्वर्यगतेनापि यत्तु पापं कृतं मया ॥ २५ ॥

चलचित्तवशेनैव कामक्रोधवशेन वा ।
क्षुत्पिपासार्दितेनापि यत्तु पापं कृतं मया ॥ २६ ॥

पानर्थां भोजनार्थं च वस्त्रार्थं स्त्रीप्सुहेतुना ।
विविधक्लेशसंतापैर्यत्तु पापं कृतं मया ॥ २७ ॥

कायवाङ्भानसं पापं त्रिधातुचरितं च तत् ।
यत्कृतमीदृशैः रूपैस्तत्सर्वं देशयाम्यहम् ॥ २८ ॥

यत्तद्बुद्धेषु धर्मेषु श्रावकेषु तथैव च ।
अगौरवं कृतं स्याद्धि तत्सर्वं देशयाम्यहम् ॥ २९ ॥

यत्तत्प्रत्येकबुद्धेषु बोधिसत्त्वेषु वा पुनः ।
अगौरवं कृतं स्याद्धि तत्सर्वं देशयाम्यहम् ॥ ३० ॥

सद्धर्मः प्रतिक्षिप्तः स्यादजानन्तेन मे सदा ।
मातापितृष्वगौरवं तत्सर्वं देशयाम्यहम् ॥ ३१ ॥

मूर्खत्वेनापि बालत्वान्मानदर्पावृतेन च ।
रागद्वेषेण मोहेन तत्सर्वं देशयाम्यहम् ॥ ३२ ॥

पूजयित्वा दशदिशि लोके दशबलाञ्जिनान् ।
उद्धरिष्याम्यहं सत्त्वान्सर्वदुःखाद्दशद्दिशि ॥ ३३ ॥

स्थापयिष्ये दशभुवि सर्वसत्त्वानचिन्तियान् ।
दशभूमौ हि स्थित्वा च सर्वे भोन्तु तथागताः ॥ ३४ ॥

एकैकस्य हि सत्त्वस्य चरेयं कल्पकोटयः ।
यावच्छक्यं हि तत्सर्वं मोक्षितुं दुःखसागरात् ॥ ३५ ॥

तेषां सत्त्वानां देशेयं गम्भीरां देशनामिमाम् ।
स्वर्णप्रभोत्तमां नाम सर्वकर्मक्षयंकरीं ॥ ३६ ॥

येन कल्पसहस्रेषु कृतं पापं सुदारुणम् ।
एकवेलं प्रकाशन्तु सर्वे व्रजन्तु संक्षयम् ॥ ३७ ॥

देशयिष्ये इमां धर्मां स्वर्णप्रभामनुत्तराम् ।
ये शृण्वन्ति शुभां तेषां संयान्तु पापसंक्षयम् ॥ ३८ ॥

स्थास्यामि दशभूमौ तान्दशरत्नाकरे वरे ।
आभासयन्बुद्धगुणैस्तरेयं भवसागरात् ॥ ३९ ॥

यच्च बुद्धसमुदौघं गम्भीरं गुणसागरम् ।
अचिन्तियबुधगुणैः सर्वज्ञत्वं प्रपूरये ॥ ४० ॥

समाधिशतसाहस्रैर्धारणीभिरचिन्तितैः ।
इन्द्रियबलबोध्यङ्गैर्भवे दशबलोत्तमः ॥ ४१ ॥

व्यवलोकय मां बुद्ध समन्वाहृतचेतसा ।
अत्ययं प्रतिगृह्णातु विमोचयतु मां भयात् ॥ ४२ ॥

यत्तु पापं कृतं पूर्वं मया कल्पशतेषु च ।
तस्यार्थे शोकचित्तोऽहं कृपणस्तृष्णयार्दितः ॥ ४३ ॥

विभेमि पापकर्मोऽहं सततं हीनमानसः।
यत्र यत्र चरिष्यामि न चास्ति मङ्गलं क्वचित्॥ ४४ ॥

सर्वे कारुणिका बुद्धाः सत्त्वभयहराः जिनाः।
अत्ययं प्रतिगृह्णन्तु मोचयन्तु च मां भयात्॥ ४५ ॥

क्लेशकर्मफलं मह्यं प्रवाहन्तु तथागताः।
स्नापयन्तु च मां बुद्धाः कारुण्यविमलोदकैः॥ ४६ ॥

सर्वपापं देशयामि यत्तु पूर्वं कृतं मया।
यच्च ह्येतर्हि मे पापं तत्सर्वं देशयाम्यहम्॥ ४७ ॥

आयत्या सर्वमापद्यन्सर्वदुष्कृतकर्मणा।
न च्छादयामि तत्पापं यद्भवेन्मम दुष्कृतम्॥ ४८ ॥

त्रिविधं  कायिकं कर्म वाचिकं तु चतुर्विधम्।
मानसं त्रिप्रकारं च तत्सर्वं देशयाम्यहम्॥ ४९ ॥

कायकृतं च वाक्कृतं मनसा च विचिन्तितम्।
कृतं दशविधं कर्म तत्सर्वं देशयाम्यहम्॥ ५० ॥

दशाकुशल वर्जित्वा सेवित्वा कुशलान्दश।
स्थास्यामि दशभूमौ च पश्ये दशबलोत्तमम्॥ ५१ ॥

यच्च मे पापकं कर्म अनिष्टफलवाहकम्।
तत्सर्वं देशयिष्यामि बुद्धानां पुरतः स्थितः॥ ५२ ॥

ये चापि जम्बुद्वीपेऽस्मिन्ये चान्यलोकधातुषु।
कुर्वन्ति कुशलं कर्म तत्सर्वमनुमोदये॥ ५३ ॥

यच्च पुण्यार्जितं मह्यं कायवाङ्‌भनसापि च ।
तेन कुशलमूलेन स्पृशेयं बोधिमुक्तमाम्॥ ५४ ॥

भवगतिसंकटबालबुद्धिना
पापं ह्यपि यच्च कृतं सुदारुणम्।
दशबलसंमुखमग्रतः स्थित-
स्तत्सर्वपापं प्रतिदेशयामि च ॥ ५५ ॥

तत्पापं समुच्चितं जन्मसंकटे विविधकामप्रचारसंकटे ।
लोकसंकटे भवसंकटे च सर्वमूर्खकृतक्लेशसंकटे ॥ ५६ ॥

चापल्यमदनचित्तसंकटे पापमित्रागमसंकटैरपि ।
संसारसंकटरागसंकटे द्वेषमोहतमसंकटैरपि ॥ ५७ ॥

अक्षयसंकटकालसंकटे पुण्यमपार्जनसंकटैरपि ।
अतुलियजिनसंमुखस्थितः तत्सर्वपापं प्रतिदेशयामि च ॥ ५८ ॥

वन्दामि बुद्धान् गुणसागरोपमान्
सुवर्णवर्णानवभासितदिगन्तान्।
तेषां जिनानां शरणं व्रजामि
मूर्ध्ना च तान्सर्वजिनान्नमामि ॥ ५९ ॥

सुवर्णवर्णं कनकाचलाभम्
वैडूर्यनिर्मलविशुद्धसुलोचनाङ्गम्।
श्रीतेजकीर्तिज्वलनाकरबुद्धसूर्यं
करुणाप्रभं विधमकं तमसान्धकानाम्॥ ६० ॥

सुनिर्मलं सुरुचिरं सुविराजिताङ्गं
संबुद्धसूर्यकनकामलनिःसृताङ्गम्।
क्लेशाग्नितप्तमनसां ज्वलनाग्निकल्पं
प्रह्लादनं मुनिनिशाकररश्मिजालम्॥ ६१ ॥

द्वात्रिंशलक्षणधरं ललितेन्द्रियाङ्गम्
अनुव्यञ्जनः सुरुचिरं सुविराजिताङ्गम्।
श्रीपुण्यतेजज्वलनाकुलरश्मिजालं
संतिष्ठसे तमसि सूर्य इव त्रिलोके॥ ६२॥

वैडूर्यनिर्मलविशालविचित्रवर्ण-
स्ताम्रारुणै रजतस्फटिकलोहिताङ्गम्।
नानाविचित्रसमलङ्कृतरश्मिजालं
त्वं संविरोचसि महामुनि सूर्यकल्पः॥ ६३॥

संसारनद्यपतितव्यसनौघमध्ये
शोकाकुले मरणतोयजरातरङ्गे।
दुःखार्णवे  परमकम्पितचण्डवेगे
संतारय सुगतभास्कररश्मिजालैः॥ ६४॥

वन्दामि बुद्धान् कनकोज्वलाङ्गान्
सुवर्णवर्णव्यवभासिताङ्गान्।
ज्ञानाकरान् सर्वत्रिलोकसारान्
विचित्ररूपान् शुभलक्षणाङ्गान्॥ ६५॥

यथा समुद्रे जलमप्रमेयं
यथा मही चाणुरजैरनन्ता।
यथोपलैर्मेरुरनन्ततुल्यो
यथैव चाकाशमनन्तपारम्॥ ६६॥

तथैव बुद्धस्य गुणा अनन्ताः
न शक्य ज्ञातुं खलु सर्वसत्त्वैः।
अनेककल्पानि तु चिन्तयन्ते
न शक्य पर्यन्तगुणानि ज्ञातुम्॥ ६७॥

महो सशैला सगिरिः ससागरा
गणं तु कल्पैरपि शक्य जानितुम्।
जलं च वालाग्रमपि प्रमाणं
न शक्य बुद्धस्य गुणाग्रपारम्॥ ६८ ॥

एतादृशी सत्त्व भवन्तु सर्वे
गुणेन वर्णेन यशेन कोटया।
गात्रेण ते शोभितलक्षणेन
अशीत्यनुव्यञ्जनमण्डितेन॥ ६९ ॥

अनेन चाहं कुशलेन कर्मणा
भवेय बुद्धो न चिरेण लोके।
देशेय धर्मं जगतो हिताय
मोचेय सत्त्वान्बहुदुःखपीडितान्॥ ७० ॥

जयेय मारं सबलं ससैन्यं
प्रवर्तयेयं शुभधर्मचक्रम्।
तिष्ठेय कल्पानि अचिन्तियानि
तर्पेय सत्त्वानमृतेन पाणिना॥ ७१ ॥

पूरेय षट्पारमिता अनुत्तरा
यथैव पूर्वं जिनपूर्वकानाम्।
हनेय क्लेशान्विधमेय दुःखान्
शमेय रागांस्तथ द्वेषमोहान्॥ ७२ ॥

जातिस्मरो नित्य भवेय चाहं
जातिशता जातिसहस्रकोटयः।
अनुस्मरेयं सततं मुनीन्द्रं
शृणवीय तेषां वचनं ह्युदारम्॥ ७३ ॥

अनेन चाहं कुशलेन कर्मणा
लभेय बुद्धेहि सदा समागमम् ।
विवर्जयेयं खलु पापकर्म
चरेय पुण्यानि शुभाकराणि ॥ ७४ ॥

सर्वत्र क्षेत्रेषु च सर्वप्राणिनां
सर्वे च पापाः प्रशमन्तु लोके ।
ये सत्त्वा विकलेन्द्रिय अङ्गहीनाः
ते सर्वि कुशलेन्द्रिय भोन्तु सांप्रतम् ॥ ७५ ॥

ये व्याधिना दुर्बलक्षीणगात्रा
निश्राणभूताश्च दशोदिशासु ।
ते सर्वि मुच्यन्तु च व्याधितो लघु
लभन्तु चारोग्यबलेन्द्रियानि ॥ ७६ ॥

कुराजचौरसमार्जितबध्यप्राप्ता
नानाविधैर्भयशतैर्व्यसनोपपन्नाः ।
ते सर्वि सत्त्वा व्यसनागतदुःखिता हि
मुच्यन्तु ते भयशतैः परमैः सुघोरैः ॥ ७७ ॥

ये पीडिता बन्धनबद्धपीडिता
विविधेषु व्यसनेषु संस्थिता हि ।
अनेकआयाससहस्रव्याकुला
विचित्रभयदारुणशोकप्राप्ताः ॥ ७८ ॥

ते सर्वे मुच्यन्तु च बन्धनेभ्यः
संताडिता मुच्यन्तु च ताडनेभ्यः ।
वध्याश्च मुच्यन्तु जीवितेभ्यो
व्यसनागता निर्भया भोन्तु सर्वे ॥ ७९ ॥

ये सत्त्व क्षुत्तर्षनिपीडिताश्च
लभन्तु ते भोजनपानचित्रम्।
अन्धाश्च पश्यन्तु विचित्ररूपान्
वधिराश्च शृण्वन्तु मनोज्ञघोषान्॥ ८० ॥

नग्नाश्च वस्त्राणि लभन्तु चित्रा
दरिद्रसत्त्वाश्च धनाँल्लभन्तु।
प्रभूतधनधान्यविचित्ररत्नाः
सर्वे च सत्त्वाः सुखिनो भवन्तु॥ ८१ ॥

मा कस्यचिद्बावतु दुःखवेदना
सुदर्शनाः सत्त्व भवन्तु सर्वे।
अभिरूपप्रासादिकसौम्यरूपा
अनेकसुखसंचित नित्य भोन्तु॥ ८२ ॥

मनःशान्तपौराः सुसमृद्धपुण्याः
वीणा मृदङ्गा पटहा सुघोषा।
उत्साः सराः पुष्करिणी तडागाः
सुवर्णपद्मोत्पलपद्मिनीभिः॥ ८३ ॥

सहचित्तमात्रेण तु तेष भोन्तु
अन्नं च पानं च तथैव वस्त्रम्।
धनं हिरण्यं मणिमुक्तिभूषणं
सुवर्णवैडूर्यविचित्ररत्नम्॥ ८४ ॥

मा दुःखशब्दाः क्वचि लोकि भोन्तु
भा चैकसत्त्वः प्रतिकूलदर्शी।
सर्वे च ते भोन्तु उदारवर्णाः
प्रभाकरा भोन्तु परस्परेण॥ ८५ ॥

या काचि संपत्ति मनुष्यलोके
सा तेषु भोतू मनसोपपत्तिः।
सर्वाभिप्राया सहचित्तमात्रैः
पुण्येन फलेन परिपूरयन्तु ॥ ८६ ॥

गन्धं च माल्यं च विलेपनं च
धूपं च चूर्णं कुसुमं च पूर्णम्।
त्रिकाले वृक्षेहि प्रवर्षयन्तु
गृह्णन्तु ते सत्त्व भवन्तु तुष्टाः ॥ ८७ ॥

कुर्वन्तु पूजां दशसू दिशासु
अचिन्तियां सर्वतथागतानाम्।
सबोधिसत्त्वान् सश्रावकाणां
धर्मस्य बोधिप्रतिसंस्थितस्य ॥ ८८ ॥

नीचां गतिं सर्वि विवर्जयन्तु
तरन्तु अष्टाङ्गिकवीचिवृत्ताः।
आसादयन्तु जिनराजमूर्तिं
लभन्तु बुद्धेहि सदा समागमम्॥ ८९ ॥

उच्चैः कुलीना हि भवन्तु नित्यं
प्रभूतधनधान्यसमृद्धकोशाः।
रूपेण शौर्येण यशेन कीर्त्या
समलङ्कृता भोन्तु अनेककल्पान्॥ ९० ॥

सर्वा स्त्रियो नित्य नरा भवन्तु
शूराश्च वीराश्च विज्ञपण्डिताश्च।
ते सर्वि बोधाय चरन्तु नित्यं
चरन्तु ते पारमितासु षट्सु ॥ ९१ ॥

पश्यन्तु बुद्धान् दशसू दिशासु
रत्नोत्तमवृक्षसुखोपविष्टान् ।
वैडूर्यसिंहासनि संनिषण्णान्
शृण्वन्तु धर्मांश्च प्रकाश्यमानान् ॥ ९२ ॥

पापानि कर्माणि मया जितानि
पूर्वार्जिता यद्भवसंकटेषु ।
ये पापकर्माभिरता वहन्ते
ते सर्वि क्षीयन्तु च निर्विशेषाः ॥ ९३ ॥

ते सर्वसत्त्वा भवबन्धनस्थाः
संसारपाशैर्दृढबन्धबद्धाः ।
प्रज्ञाकरैर्भासित भोन्तु बन्धना -
न्मुच्यन्तु दुःखैरुपजा भवन्तु ॥ ९४ ॥

ये चापि सत्त्वा इह जाम्बुद्वीपे
ये चापि अन्यषु च लोकधातुषु ।
कुर्वन्तु गम्भीरविचित्रपुण्यं
तत्सर्वपुण्यं ह्यनुमोदयामि ॥ ९५ ॥

तेनैव पुण्याभ्यनुमोदनेन
कायेन वाचा मनसार्जितेन ।
प्रणिधानसिद्धिः सफला मयास्तु
स्पृशेय बोधिं विरजामनुत्तराम् ॥ ९६ ॥

यो वन्दते तोष्यति दशबलान् सदा च
प्रसन्नशुद्धामलमानसेन ।
इमाय परिणामनदेशनाय
षष्टिं च कल्पान् जहते अपायान् ॥ ९७ ॥

एतेभि श्लोकेभि च वर्णितेभिः
पुरुषाः स्त्रियो ब्रह्मणक्षत्रिया च।
यस्तोष्यते मुनिं स कृताञ्जलिभिः स्थिहित्व
सर्वत्र जातिस्मरु शतजातिषु ॥ ९८ ॥

सर्वाङ्ग सर्वेन्द्रिय शोभिताङ्गो
विचित्रपूर्णेभिगुणैरुपेतः।
नरेन्द्रराजैश्च सुपूजितः सदा
एतादृशो भेष्यति तत्र तत्र ॥ ९९ ॥

न तैरेकस्य बुद्धस्य चान्तिके कुशलं कृतम्।
न द्वयोरपि त्रयेषु न पञ्चसु न दशसु ॥ १०० ॥

तथा बुद्धसहस्राणामान्तिके कुशलं कृतम्।
येषामिदं कर्णपुटे देशनं प्रविष्यतीति ॥ १०१ ॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे
देशनापरिवर्तो नाम चतुर्थः ॥

## ॥ कमलाकरसर्वतथागतस्तवपरिवर्तः ॥

अथ खलु भगवांस्तां बोधिसत्त्वसमुच्चयां कुलदेवतामेतदवोचत्। तेन खलु पुनः कुलदेवते कालेन तेन समयेन राजा सुवर्णभुजेन्द्रो नामासीत्। एतेन कमलाकरेण सर्वतथागतस्तवेनातीतानागतप्रत्युत्पन्नान् बुद्धान् भगवतोऽभ्यस्तावीत्॥

ये जिन पूर्वक ये च भवन्ति
ये च ध्रियन्ति दशोदिशि लोके।
तेष जिनान करोमि प्रणामं
तं जिनसंघमहं प्रशयिष्ये॥ १॥

शान्तप्रशान्तविशुद्धमुनीन्द्रं
सुवर्णवर्णप्रभासितगात्रम्।
सर्वसुरासुरसुस्वरबुद्धं
ब्रह्मरुते स्वरगर्जितघोषम्॥ २॥

षट्पदमौलमहीरुहकेशं
नीलसुकुञ्चितकाशनिकाशम्।
शङ्खतुषारसुपाण्डलदन्तं
हेमविराजितभासितनाभम्॥ ३॥

नीलविशालविशुद्धसुनेत्रं
नीलमिवित्पलप्रच्युतिभासम्।
पद्मसुवर्णविशालसुजिह्वं
पद्मप्रभासितपद्ममुखाभम्॥ ४॥

शङ्खमृणालनिभामुखतोर्णं
दक्षिणवर्तितवेरुलिवर्णम्।
सूक्ष्मनिशाकरक्षीणशशीव
गात्र मुनेर्भ्रमराज्वलनाभम्॥ ५॥

काञ्चनकोटि सुवर्णमृदुरं
नासमुखोन्नत पीवरघ्राणम्।
अग्रधराग्रविशिष्टसुनासं
मृदुक सर्वजिनांश सततम्॥ ६॥

एकसमे चित्तरोममुखाग्रं
वालसुरोमप्रदक्षिणवर्तम्।
नीलनिभा ज्वलकुण्डलजातं
नीलविराजितमौलिसुग्रीवम्॥ ७॥

जातसमानप्रभासितगात्रं
पूजितसर्वि देशोदिशि लोके।
दुःखमनन्तप्रशान्तत्रिलोके
सर्वसुखेन च तर्पितसत्त्वम्॥ ८॥

नरकगातिष्वथ तिर्यग्गतीषु
प्रेतसुरासुरमनुष्यगतीषु।
तेषु च सर्वसुखार्पितसत्त्वं
सर्वप्रशान्त अपायगतीषु॥ ९॥

वर्णसुवर्णकनाकनिभासं
काञ्चनतप्तप्रभासितगात्रम्।
सौम्यशशाङ्कसुविमलवक्रं
विकासितराजितसुविमलवदनम्॥ १०॥

तरुणतनूरुहकोमलगात्रं
सिंहमिवाक्रमविक्रमनागम्।
लम्बितहस्त प्रलम्बितबाहुं
मारुतप्रेरितशाललतेव॥ ११॥

व्योमप्रभाज्वलमुञ्चितरश्मिं
सूर्यसहस्रमिव प्रतपन्तम् ।
निर्मलगात्रवरेभि मुनीन्द्रं
सर्वप्रभासित क्षेत्रमनन्तम् ॥ १२ ॥

चन्द्रनिशाकरभास्करजालं
क्षेत्रमनन्तसहस्रशतेषु ।
तेऽपि च निष्ठित सर्वमभूषि
बुद्धप्रभासविरोचनतायै ॥ १३ ॥

बुद्धदिवाकरलोकप्रदिपं
बुद्धदिवाकरशतसहस्रम् ।
क्षेत्रमनन्तसहस्रशतेषु
पश्यतु सत्त्व तथागतसूर्यम् ॥ १४ ॥

पुण्यसहस्रशताचितकायं
सर्वगुणेभिरलङ्कृतगात्रम् ।
शौण्डगजेन्द्रनिभं जिनबाहुं
विमलसुलक्षणमण्डितहस्तम् ॥ १५ ॥

भूमितलोपमरजसमतुल्यं
सूक्ष्मरजोपम ये गतबुद्धाः ॥
सूक्ष्मरजोपम ये च भवन्ति
सूक्ष्मरजोपम ये च स्थिहन्ति ॥ १६ ॥

तेष जिनान करोमि प्रणामं
कायतु वाचमनेन प्रसन्नः ।
पुष्पप्रदानसुगन्धप्रदानै -
वर्णशतेन सुचेतसि चापि ॥ १७ ॥

जिह्वशतैरपि बुद्धगुणानि
कल्पसहस्रशते न हि वक्तुम्।
ये गुणसाधुनिवृत्ति जिनानां
सा च वराग्रविचित्र अनेकैः ॥ १८ ॥

एकजिनस्य गुणा न हि शक्या
जिह्वशतैरपि भाषितु कश्चित्।
काममशक्ति हि सर्वजिनानां
एकगुणस्य हि विस्तर वक्तुम्॥ १९ ॥

सर्वसदेवकुलोक्तसमूहः
सर्वभवाग्रभवे जलपूर्णा।
केशग्रहणेन तु शक्य प्रमातुं
नैव च एकगुणा सुगतानाम्॥ २० ॥

वर्णित संस्तुत मे जिनसर्वं
कायतु वाच प्रसन्नमनेन।
यन्मम सञ्चितपुण्यफलाग्रं
तेन च सत्त्व प्रभोतु जिनत्वम्॥ २१ ॥

एवं स्तवित्व नरपति बुद्धं
एवं करोति नृपः प्रणिधानम्।
यत्र च कुत्रचि मह्य भवेत
जाति अनागतकल्पमनन्ता ॥ २२ ॥

ईदृशि भेरि मि पश्यमि स्वप्ने
ईदृश देशन तत्र शृणोमि।
ईदृश जीनस्तुतिकमलाकर
जातिषु तत्र लभे स्मरणत्वम्॥ २३ ॥

बुद्धगुणानि अनन्तमतुल्या
येऽपि च दुर्लभ कल्पसहस्रैः ।
अमु श्रुणेय च स्वप्नगतोऽपि
तेषु च देशयि दिवसगतोऽपि ॥ २४ ॥

दुःखसमुद्र विमोचयि सत्त्वा
पूरयि षडभि पि पारमिताभिः ।
बोधिमनुत्तर पश्च लभेयं
क्षेत्र भवेत ममा असमर्थ्यम् ॥ २५ ॥

भेरिप्रदानविपाकफलेन
सर्वजिनान च  संस्तुतिहेतोः ।
संमुख पश्यमि शाक्यमुनीन्द्रं
व्याकरणं ह्यहु तत्र लभेयम् ॥ २६ ॥

ये इम दारक द्वौ मम पुत्रौ
कनकेन्द्र कनकप्रभास्वरः ।
ते उभि दारक तत्र लभेयं
बोधिमनुत्तर व्याकरणं च ॥ २७ ॥

येऽपि च सत्त्व अरक्ष अत्राणा
शरणविहीन वियासगताश्च ।
तेषु भवेय अनागत सर्व
त्राणपरायणशरणेभिश्च ॥ २८ ॥

दुःखसमुद्भवसंक्षयकर्ता
सर्वसुखस्य च आकरभूतः ।
कल्प अनागत बोधि चरेयं
यत्तक पूर्वककोटिगताश्च ॥ २९ ॥

स्वर्णप्रभोत्तमदेशनताय
पापसमुद्र शोषतु मह्यम्।
कर्मसमुद्र विकीर्यतु मह्यं
क्लेशसमुद्र विच्छिद्यतु मह्यम्॥ ३० ॥

पुण्यसमुद्र प्रपूर्यतु मह्यं
ज्ञानसमुद्र विशोध्यतु मह्यम्।
विमलज्ञानप्रभासबलेन
सर्वगुणान समुद्र भवेया॥ ३१ ॥

बोधिगुणैर्गुणरत्न प्रपूर्णा
देशनस्वर्ण प्रभासबलेन।
पुण्यप्रभास भविष्यति मह्यं
बोधिप्रभास विशोध्यतु मह्यम्॥ ३२ ॥

कायप्रभास भविष्यति मह्यं
पुण्यप्रभास विरोचनता च।
सर्वत्रिलोकि विशिष्ट भवेयं
पूण्यबलेन समन्वित नित्यम्॥ ३३ ॥

दुःखसमुद्र उत्तारयिता
सर्वसुखस्य च सागरकल्प्य।
कल्पमनागत बोधि चरेयं
यत्तकपूर्वककोटिगताश्च॥ ३४ ॥

यादृशक्षेत्रविशिष्ट त्रिलोके
सर्वजिनानमनन्त गुणेन।
तादृशक्षेत्रमनन्तगुणं
भेष्यति मह्यमनागतसर्वम्॥ ३५ ॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे कमलाकर सर्वतथागतस्तवपरिवर्तो नाम पञ्चमः॥

## ॥ शून्यतापरिवर्तः ॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

अन्येषु सूत्रेषु अचिन्तियेषु
अतिविस्तरं देशितशून्यधर्माः ।
तस्मादिमे सूत्रवरोत्तमे वः
संक्षेपतो देशित शून्यधर्माः ॥ १ ॥

सत्त्वोऽल्पबुद्धिरविजानमानो
न शक्य ज्ञातुं खलु सर्वधर्मा ।
पश्येह सूत्रेन्द्रवरोत्तमेन
संक्षेपतो देशित शून्यधर्माः ॥ २ ॥

अन्यैरुपायैर्नयहेतुभिश्च
सत्त्वान कारुण्यवशोदयार्थम् ।
प्रकाशितं सूत्रवरेन्द्रमेतं
यथाभिजानन्ति हि सर्वसत्त्वाः ॥ ३ ॥

अयं च कायो यथ शून्यग्रामः
षड्ग्राम चोरोपम इन्द्रियाणि ।
तान्येकग्रामे निवसन्ति सर्वे
न ते विजानन्ति परस्परेण ॥ ४ ॥

चक्षुरिन्द्रियं रूपमेतेषु धावति
श्रोत्रेन्द्रियं शब्दविचारणेन ।
घ्राणेन्द्रियं गन्धविचित्रहारि
जिह्वन्द्रियं नित्य रसेषु धावति ॥ ५ ॥

कायेन्द्रियं स्पर्शगतोऽभिधावति
मनेन्द्रियं धर्मविचारणेन ।

षडिन्द्रियाणीति परस्परेण
स्वकं स्वकं विषयमभिधावति ॥ ६ ॥

चित्तं हि मायोपम चञ्चलं च
षडिन्द्रियं विषयविचारणं च ।
यथा नरो धावति शून्यग्रामे
संग्राम चौरेभि समाश्रितश्च ॥ ७ ॥

चित्तं यथा षड्विषयाश्रितं च
प्रजानते इन्द्रिय गोचरं च ।
रूपं च शब्दं च तथैव गन्धं
रसं च स्पर्श तथ धर्मगोचरम् ॥ ८ ॥

चित्तं च सर्वत्र षडिन्द्रियेषु
शकुनिरिव चञ्चलं इन्द्रियसंप्रविष्टम् ।
यत्र यत्रेन्द्रियसंश्रितं च
न चेन्द्रियं कुर्वतु जानमात्मकम् ॥ ९ ॥

कायश्च निश्चेष्ट निर्व्यापारं च
असारकः प्रत्ययसंभवश्च ।
अभूतविकल्पसमुत्थितश्च
स्थितकर्मयन्त्रं इवं शून्यग्रामः ॥ १० ॥

क्षित्यम्भतेजोऽनिलानि यथा
चौरग्रामान्तः स्थित देशदेशे ।
परस्परेणैव सदा विरुद्धा
यथैव आशीविष एकवेश्मनि ॥ ११ ॥

धातूरगास्ते च चतुर्विधानि
द्वे ऊर्ध्वगामी द्वय हेष्टगामी ।

द्वयाद्वयं दिशि विदिशासु सर्वं
नश्यन्ति ता धातुभुजङ्गमानि ॥ १२ ॥

क्षित्युरगश्च सलिलोरगश्च
इमौ च हेष्टा क्षयतां व्रजेते।
तेजोरगश्चानिलमारुतोरग
इमौ हि द्वे ऊर्ध्वगतौ नभोऽन्ते ॥ १३ ॥

चित्तं च विज्ञानमध्यस्थितं च
गत्वा यथा पूर्वकृतेन कर्माणा।
देवे मनुष्येषु च त्रिष्वपाया
यथाकृतं पूर्वभवे प्रवर्त्त्या ॥ १४ ॥

श्लेष्मानिलपित्तक्षयान्तप्राप्तः
कायः शकृन्मूत्रपरीषपूर्णः।
निराभिरामः कृमिक्षुद्रपूर्णः
क्षिप्तः श्मशाने यथ काष्ठभूतः ॥ १५ ॥

पश्याहि त्वं देवत एभि एवं
कत्यत्र सत्त्वस्तथ पुद्गलो वा।
शून्या हि एते खलु सर्वधर्मा
अविद्यतः प्रत्ययसंभवाश्च ॥ १६ ॥

एते महाभूत अभूत सर्वाश्च
यस्मान्महाभूतप्रकृत्यभावा।
तस्माच्च भूता हि असंभवाश्च
अविद्यमाना न कदाचि विद्यते ॥ १७ ॥

अविद्यतः प्रत्ययसंभवाश्च
अविद्यमानैव अविद्यवाचः।

तस्मान्मया उक्त अविद्य एषा
संस्कारविज्ञान सनामरूपम् ॥ १८ ॥

षडायतनस्पर्श तथैव वेदना
तृष्णा उपादान तथा भवश्च ।
जातिजरामरणशोक उपद्रवाणां
दुःखानि संस्कार अचिन्तियानि ॥ १९ ॥

संसारचक्रे च यथा स्थितानि
अभूत संभूत असंभवाश्च ।
अयोनिशश्चित्तविचारणं तथा
दृष्टीगतं छेत्स्यथ आत्मनैव ॥ २० ॥

ज्ञानासिना छिन्दथ क्लेशजालं
स्कन्धालयं पश्यथ शून्यभूतम् ।
स्पर्शेथ तं बोधिगुणं ह्युदारं
विवर्त च मे  अमृतपुरस्य द्वारम् ॥ २१ ॥

संदर्शि तं अमृतपुरस्य भाजनं
प्रवेक्ष्य  तं अमृतपुरालयं शुभम् ।
तर्पिष्य ह अमृततरसेन आत्मनां
पराहता मे वरधर्मभेरीः ॥ २२ ॥

आपूरितो मे वरधर्मशङ्खः
प्रज्वालिता मे वरधर्म उल्का ।
सुवर्षितं मे वरधर्मवर्षं
पराजिता मे परक्लेशशत्रवः ॥ २३ ॥

उच्छ्रेपितं मे वरधर्मध्वजं
प्रतारिता मे भवसत्त्वसमुद्राः ।

पिधितानि मेऽपायपथानि त्रीणि
क्लेशाग्निदाहं शमयित्व प्राणिनाम् ॥ २४ ॥

यस्माद्धि पूर्वमहमनेककल्पान्
अचिन्तिया पूजित्व नायका हि ।
चरित्व बोधाय दृढव्रतेन
सद्धर्मकायं परिवेषमाणः ॥ २५ ॥

हस्तौ च पादौ च परित्यजित्वा
धनं हिरण्यं मणिमुक्तभूषणम् ।
नयनोत्तमाङ्गं प्रियदारपुत्रं
सुवर्णवैडूर्यविचित्ररत्नानि ॥ २६ ॥

छिन्दित्वा त्रिसाहस्रायां सर्ववृक्षवनस्पतीम् ।
सर्वं च चूर्णयित्वा तत् कुर्यात् सूक्ष्मरजोपमम् ॥ २७ ॥

चूर्णराशिं करित्वा तु यावदाकाशगोचरम् ।
अशकद्भभागभिन्नाय धरणीरजःसमानि वा ॥ २८ ॥

सर्वसत्त्वा अनेके हि ज्ञानवत तथैव च ।
सर्वं गणयितुं शक्यं न तु ज्ञातं जिनस्य च ॥ २९ ॥

एकक्षणप्रवृत्तं तु यज्ज्ञानं च महामुनेः ।
अनेककल्पकोटीषु न शक्यं गणयितुं क्वचित् ॥ ३० ॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे शून्यतापरिवर्तो
नाम षष्ठः ॥

# ॥ चतुर्महाराजपरिवर्तः ॥

अथ खलु वैश्रवणो महाराजो धृतराष्ट्रो महाराजो विरूढको महाराजो विरूपाक्षो महाराज उत्थायसनेभ्य एकांसेन चीवराणि प्रावृत्य दक्षिणजानुमण्डलानि पृथिव्यां प्रतिष्ठाप्य येन भगवांस्ते-नाञ्जलिं प्रणम्य भगवन्तमेतदवोचन्। अयं भगवन्, सुवर्णप्रभासोत्तमसूत्रेन्द्रराजः सर्वतथागतभाषितः सर्वतथागतावलोकितः सर्वतथागतसमन्वागतः सर्वबोधिसत्त्वगणनमस्कृतः सर्वदेवगणपूजितः सर्वे-देवेन्द्रगणसंप्रहर्षकः सर्वलोकपालस्तुतः स्तवितो वर्णितः प्रशंसितः सर्वदेवभवनावभासितः सर्व-सत्त्वानां परमसुखप्रदायकः सर्वनरकतिर्यग्योनियमलोकदुःखसंशोधकः सर्वभयप्रतिशमनः सर्वपरचक्र-प्रतिनिवर्तको दुर्भिक्षकान्तारप्रशमनो व्याधिकान्तारप्रणाशको ज्ञानप्रकाशकः परमशान्तिकरः शोका-यासप्रशमनो विविधनानोपद्रव्यप्रशमयितोपद्रवशतसहस्रप्रणाशयिता। इममस्य भदन्त भगवन् सुवर्ण-प्रभासोत्तमसूत्रेन्द्रराजस्य विस्तरेण पर्षदि संप्रकाश्यमानस्यास्माकं चतूर्णां महाराजानां सबल-परिवाराणाम्। एतेन च धर्मश्रवणेन धर्मामृतरसेन च दिव्यात्मभावमहातेजसा विवर्धयिष्यन्ति॥ अस्माकं कायेषु वीर्यं च बलं स्थाम च संजनितं भविष्यन्ति। तेजश्च श्रियं च लक्ष्मीं चास्माकं कायेष्वाविशन्ति। वयं भगवंश्चत्वारो महाराजा धार्मिकाश्च धर्मवादिनश्च धर्मराजा धर्मेण वयं भदन्त भगवन् देवनागयक्षगन्धर्वासुरगरुडनरमहोरगाणां राजत्वं कारयिष्यामः। ते वयं भगवन्, चत्वारो महाराजाः सार्धमष्टाविंशतियक्षसेनापतिभिरनेकैश्च यक्षशतसहस्रैः सततसमितं सर्वे जम्बुद्वीपं दिव्येन विशुद्धेनातिक्रान्तमानुष्यकेण व्यवलोकयिष्याम आरक्षयिष्यामः परिपाचयिष्यामः। तेन हेतुना भदन्त भगवन्नस्माकं चतुर्णां महाराजानां लोकपाल इति संज्ञोत्पादिता॥

ये केचिद्भदन्त भगवन्नस्मिन् जम्बुद्वीपे विपर्यासाः परचक्रेण चोपहता भविष्यन्ति, दुर्भिक्षकान्तरेण वा नानाविधैरुपद्रवशतैरुपद्रवसहस्रैरुपद्रवशतसहस्रैरुपहता भविष्यन्ति, ते वयं भदन्त भगवन् चत्वारो महाराजा इदमस्य सुवर्णप्रभासोत्तमसूत्रेन्द्रराजस्य तेषां च सूत्रेद्रधारिणां भिक्षूणां संचोदनां करि-ष्यामः। यदा चेमे भदन्त भगवन् धर्मभाणका भिक्षवोऽस्माकं चतुर्णां महाराजानां संचोदनया बुद्धा-धिष्ठानेन च येषु विषयेषूपसंक्रमेयुस्तेषु ते विषयेषुः चेमं सुवर्णप्रभासोत्तमसूत्रेन्द्रराजं विस्तरेण संप्रकाशयेयुः। य इमान्येवंरूपाणि विषयगताति नानाविधान्युपद्रवशतान्युपद्रवसहस्रान्युपद्रवशत-सहस्राणि च प्रशमयिष्यन्ति॥

यस्य च भदन्त भगवन् मनुष्यराजस्य विषये ते सूत्रेन्द्रधारका भिक्षवा धर्मभाणाका उपसंक्रान्ता भविष्यन्ति। अयं च मनुष्यराज इमं सुवर्णप्रभाससूत्रेन्द्रराजं शृण्यात्। श्रुत्वा च तेषां सूत्रेन्द्रधारकाणां भिक्षूणां सर्वप्रत्यर्थिकेभ्य आरक्षां कुर्यात् परित्राणं परिग्रहं परिपालनं कुर्यात्। ते वयं भदन्त भगवन्

चत्वारो महाराजास्तस्य मनुष्यराजस्य सर्वविषयगतानां च सत्त्वानामारक्षां करिष्यामः परित्राणं परिग्रहं परिपालनं शान्तिस्वस्त्ययनं करिष्यामः। यदा च भदन्त भगवन् सर्वमनुष्यराजः सूत्रेन्द्र-धारकाणां भिक्षुभिक्षुण्युपासकोपासिकानां सर्वसुखोपधानैः सुखतां कुर्यात्। ते वयं भदन्त भगवन् चत्वारो महाराजास्तं मनुष्यराजं सर्वराजेभ्यः सत्कृततरं करिष्यामो गुरुकृतं च करिष्यामो मानितं च पूजितं च सर्वविषयेषु च प्रसंशनीयं करिष्यामः।

अथ खलु भगवांश्चतुर्णां महाराजानां साधुकारमदात्। साधु साधु महाराजाः साधु साधु युष्माकं महाराजाः। यथापि ते यूयं पूर्वजिनकृताधिकारा अवरोपितकुशलमूला बहुबुद्धकोटीनियुतशतसहस्र-पर्युपासिता धर्मिकाश्च धर्मवादिनश्च धर्मेण देवानां च मनुष्याणां च राजत्वं कारयध्वम्। यथापि पूर्वदीर्घरात्रं सर्वसत्त्वानां हितचित्ताः सुखमैत्रीचित्ताः सर्वसत्त्वहितसुखाध्याशयप्रतिपन्नाः सर्वाहित-प्रतिषेधिकाः सर्वसत्त्वानां सर्वहितोपसंहाराभियुक्ताः। ते यूयं चत्वारो महाराजास्तेषां मनुष्यराजस्य च सुवर्णप्रभासोत्तमसूत्रेन्द्रराजस्य पूजासत्काराभियुक्तानामारक्षां करिष्यत परित्राणं परिग्रहं परिपालनं शान्तिस्वस्त्ययनं करिष्यत। तेन युष्माभिश्चतुर्महाराजैः सबलपरिवारैरनेकैश्च यक्षशतसहस्रैरतीता-नागतप्रत्युत्पन्नानां बुद्धानां भगवतां धर्मनेत्र्यारक्षिता भविष्यति परिपालिता च परिगृहीता च भविष्यति। तेन युष्माकं चतुर्णां महाराजानां सबलपरिवाराणमनेकेषां यक्षशतसहस्राणां देवानां देवासुरसंग्रामे जयो भविष्यति, असुराणां च परिजयो भविष्यति। सर्वपरचक्रप्रमर्दकस्य सुवर्णप्रभासो-त्तमसूत्रेन्द्रराजस्यार्थाय तेषां सूत्रेन्द्रधारकाणां भिक्षुभिक्षुण्युपासकोपासिकानामारक्षां करिष्यत परित्राणं परिग्रहं परिपालनं शान्तिस्वस्त्ययनं करिष्यत्॥

अथ वैश्रवणो महाराजो धृतराष्ट्रो महाराजो विरुढको महाराजो विरूपाक्षो महाराज उत्थायासनेभ्य एकांसानि चीवरैः प्रावृत्य दक्षिणानि जानुमण्डलानि पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तमेतदवोचन्। अयं भदन्त भगवन्, सुवर्णप्रभासोत्तमसूत्रेन्द्रराजोऽनागतेऽध्वनि यत्र ग्रामनगर-निगमजनपदराष्ट्रराजधानीषु प्रचरिष्यति यस्य यस्य मनुष्यराजस्य विषयमनुप्राप्तो भविष्यति। कश्चिद्भदन्त भगवन्मनुष्यराजो भगवन् येनानेन देवेन्द्रसमयेन राजशास्त्रेण राजत्वं कारयेत्। अस्य सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य श्रोता भवंस्ताश्च सूत्रेन्द्रधारका भिक्षुभिक्षुण्युपासकोपासिकाः सत्कुर्याद्गुरुकुर्यान्मानयेत्पूजयेत्सततसमितं सुवर्णप्रभासोत्तमसूत्रेन्द्रराजं शृणुयात्। अनेन धर्मश्रवणेन संचोदनधर्मामृतपुण्यात्मकानामस्माकं चतुर्णां महाराजानां सकलपरिवाराणामनेकेषां च यक्षराक्षस-शतसहस्राणामिमान् दिव्यात्मभावान् महतौजसा विवर्धयेत्। महान्तं वीर्यं च स्थाम च बलं चास्माकं कायेषु तेजःश्रियश्च लक्ष्मी चास्माकं विवर्धयेत्। तेन वयं भदन्त भगवंश्चत्वारो महाराजाः सबल-परिवारा अनेकैः यक्षशतसहस्रैरदृश्यद्भिः कायात्मभावैरेतर्हि चानागतेऽध्वनि यत्र ग्रामनगरनिगम-

जनपदराष्ट्रराजधानीषूपसंक्रमिष्यामः तत्रायं सुवर्णप्रभासोत्तमः सूत्रेन्द्रराजः प्रचरिष्यति। तेषां च मनुष्यराजानामस्य सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य श्रोतॄणां मातापितॄणां चारक्षां करिष्यामः। परित्राणं परिपालनं दण्डपरिहारं शस्त्रपरिहारं शान्तिस्वस्त्ययनं च करिष्यामः। तेषां च राजकुलानां तेषां च राष्ट्राणां तेषां च विषयाणामारक्षां करिष्यामः। परित्राणं परिग्रहं परिपालनं दण्डपरिहारं शस्त्रपरिहारं शान्तिस्वस्त्ययनं करिष्यामः। तांश्च विषयान् सर्वभयोपायासेभ्यः परिमोचयिष्यामः परचक्राणि च प्रतिनिवर्तयिष्यामः।

यः कश्चित् तस्य मनुष्यराजस्य सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य श्रोतुर्मानयितुः पूजयितुरन्यः सामन्तकः प्रतिशत्रुराजा भवेत्। यदा च भदन्त भगवंस्तस्य सामन्तकस्य प्रतिशत्रो राज्ञ एवं चित्त-मुत्पादेत्। सोऽहं चतुरङ्गेन बलकायेन सार्धमस्य विषयमुपसंक्रमेयं विनाशयितुम्। तेन खलु पुन-र्भदन्त भगवान् कालेन तेन समयेनास्य सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य तेजोऽनुभावेन तस्य सामन्तकस्य प्रतिशत्रुराजस्यान्यै राजभिः सार्धं संग्रामे भविष्यति। स्वविषयगताश्च विषयविलोपाश्च भविष्यन्ति। दारुणाश्च राजसंक्षोभा भविष्यन्ति। ग्रहरोगाश्च विषये प्रादुभूता भविष्यन्ति। नाना-व्याक्षेपशतानि विषये प्रादुर्भूतानि भविष्यन्ति। यदा च भदन्त भगवंस्तस्य सामन्तकस्य प्रतिशत्रु-राजस्य स्वविषयगतान्येवंरूपाणि नानोपद्रवशतानि नानाव्यक्षेपशतानि भवेयुः। स च भदन्त भगवन् सामन्तकप्रतिशत्रुराजश्चतुरङ्गीणीं सेनां योजयित्वा परचक्रगमनाय स्वविषयान्निष्क्रान्तो भवेत्। यत्रायं सुवर्णप्रभासोत्तमः सुत्रेन्द्रराजो भवेत् स प्रतिशत्रुराजः सार्धं चतुरङ्गबलकायेन तं विषयमुपसंक्र-मितुकामो भवेत्। तं विनाशितुकामो भवेत्। ते वयं भदन्त भगवञ्चत्वारो महाराजाः सबलपरिवारा अनेकैर्यक्षराक्षसशतसहस्त्रैरदृश्यैरात्मभावैस्तत्रोपसंक्रमिष्यामः तं परचक्रमध्वानं मार्गप्रतिपन्नं तथैव प्रतिनिवर्तयिष्यामो नानाव्याक्षेपशतानि चोपसंहरिष्यामो विघ्नांश्च करिष्यामः। यथा च तत्परचक्रं न शक्ष्यति तत्र विषय उपसंक्रमितुम्। कुतः पुनर्विनाशं करिष्यति॥

अथ खलु भगवांस्तेषां चतुर्णां महाराजानां साधुकारमदात्। साधु साधु महाराजाः साधु खलु पुनर्युष्माकं महाराजानाम्। यद्यूयमत्या असंख्येयकल्पकोटीनियुतशतसहस्त्रसमुदानीताया अनुत्तरायाः सम्यक्संबोधेरर्थाय तेषां मनुष्यराजानामस्य च सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य श्रोतॄणामारक्षां करिष्यथ। परित्राणं परिग्रहं परिपालनं शान्तिस्वस्त्ययनं करिष्यथ। तानि च राजकुलानि तानि नगराणि तानि च राष्ट्राणि तानि च विषयाण्यारक्षयिष्यथ। परित्राणं परिग्रहं परिपालनं दण्डपरिहारं शस्त्रपरिहारं शान्तिस्वस्त्ययनं करिष्यथ। तानि च विषयाणि सर्वभयोपद्रवोपसर्गापायासेभ्यः परि-मोचयिष्यथ। परचक्राणि च निवर्तयिष्यथ। सर्वजम्बुद्वीपगतानां चास्य मनुष्यराजस्याकलहया-भण्डनयाविग्रहया विवादयौत्सुक्यमपपद्यथ। यथा च ते युष्माकं चतुर्णां महाराजानां सबल-

परिवाराणामस्मिञ्जम्बुद्वीपे तेषु चतुर्षु नगरसहस्रेषु तानि चतुरशीतिनगरसहस्राणि तेषु तेषु विषयेष्व-भिरमेयुस्तेन च राज्यैश्वर्येणाभिरमेयुस्तेन च धनस्कन्धेन परस्परं न विहेठयेयुः। न परस्परं विहेठं जनयेयुः। स्वेन च यथा पूर्वकर्मोपचयेन राजत्वं प्रतिलभेयुः। स्वेन च राज्यैश्वर्येण च तुष्टा भवेयुः। न च परस्परेण विनाशयेयुः। न विषेय विनाशाय परक्रमेयुः॥

यथा चास्मिञ्जम्बुद्वीपे तेषु चतुरशीतिषु विषयनगरसहस्रेषु तानि चतुरशीतिराज सहस्राणि परस्परेण हितचित्तानि मैत्रीचित्तानि सुखचित्तानि परस्परेण कलहयाभण्डनयाविग्रहयाविवादया स्वेषु स्वेषु विषयेष्वभिरमेरन्तेन पुण्येन चतुर्णां महाराजानां सबलपरिवाराणामयं च जम्बुद्वीपः स्फीतो भविष्यति। सुभिक्षश्च रमणीयश्च बहुजनसमाकीर्णश्चर्द्धश्चौजोवतरश्च भविष्यति। ऋतुमासार्धमास-संवत्सराणि च सर्वाणि समाचारयुक्तानि भविष्यन्ति। अहोरात्रं ग्रहनक्षत्रचन्द्रसूर्याश्च समाग्रहिष्यन्ति। कालेन च वर्षधाराः पृथिव्यां निपतिष्यन्ति। सर्वजम्दुद्वीपगतानि च सत्त्वानि सर्वधनधान्यसमृद्धानि भविष्यन्ति। महाभोगानि चामत्सराणि च भविष्यन्ति। परित्यागवन्ति दशकुशलकर्मपथसमन्वा-गतानि च भविष्यन्ति। यद्भूयसा सुगतौ स्वर्गलोक उपपत्स्यन्ते। देवभुवनानि चाकीर्णानि भविष्यन्ति देवैर्देवपुत्रैश्च॥

यत्कश्चिन्महाराजो भवेद् य इत्थमस्य सुवर्णप्रभासत्तमस्य सूत्रेन्द्रराजस्य श्रोता भवेन्मानयिता च पूजयिता च तेषां च सूत्रेन्द्रधारकाणां भिक्षुभिक्षुण्युपासकोपासिकानामौत्सुक्यं सत्कुर्याद् गुरुकुर्यान्मा-नयेत्पूजयेत्। युष्माकं चतुर्णां महाराजानां सबलपरिवाराणामनेकेषां च यक्षशतसहस्राणामनुकम्पार्थाय सततसमितं सुवर्णप्रभासोत्तमं सूत्रेन्द्रराजेन्द्रं शृण्वन्। अनेन धर्मश्रवणसलिलोदकेन युष्मा-कमेतान्यात्मभावानि संतर्पयेत्। महतौजसा युष्माकमेतानि शरीराणि विवर्धयेत्। महच्च युष्माकं वीर्यं च स्थाम बलं च वपुषः संजनयेत्। तेजश्च श्रियश्च लक्ष्मीश्च युष्माकं विवर्धयेत्। तेन च मनुष्यराजेन मम शाक्यमुनेस्तथागतस्यार्हतः सम्यक्संबुद्धस्याचिन्त्या महाविपुलविस्तीर्णा पूजा कृता भविष्यति। तेन तस्य मनुष्यराजेनातीतानागतप्रत्युत्पन्नानां बुद्धानामनेकेषां तथागतानां कोटीनियुतशतसहस्राणा-मचिन्त्या महती विस्तीर्णा सर्वोपकरणैः पूजा कृता भविष्यति। तेन तस्य मनुष्यराजस्य महत्यारक्षा कृता भविष्यति। तेन च तस्य राज्ञो रक्षां परित्राणं परिग्रहं परिपालनं दण्डपरिहारं शस्त्रपरिहारं शान्तिस्वस्त्ययनं कृतं भविष्यति। अग्रमहिष्याश्च राजपुत्राणां च सर्वान्तःपुरस्य च राजकुलस्य च सर्वस्य महत्यारक्षा कृता भविष्यति। परित्राणं परिग्रहं परिपालनं शान्तिस्वस्त्ययनं कृतं भविष्यति। राजकुलनिवासन्यश्च सर्वदेवता ओजोवत्तराश्च चित्तेन सुखसौमनस्येन समन्वागता भवितारो रतिमनु-भविष्यन्ति। तानि च राष्ट्राणि तानि च विषयाणि चारक्षितानि भविष्यन्ति। परिपाचितानि चानुत्पीडि-तानि चाकण्टकानि भविष्यन्ति। सर्वपरचक्रान्यवमर्दितानि चानुपसर्गाणि चानुपायासानि चेति॥

एवमुक्ते वैश्रवणो महाराजो धृतराष्ट्रो महाराजो विरूढको महाराजो विरूपाक्षो महाराजस्ते सर्वे भगवन्तमेतदवोचन्। तेन च भगवन्मनुष्यराजेन सुस्नातगात्रेण भवितव्यं सुगन्धवासनधारिणा नवरुचिरवस्त्रप्रावृतेन नानालंकारविभूषितेन भवितव्यम्। आत्मनश्च नीचतरमासनं प्रज्ञपयितव्यम्। तत्रासने निषीदित्वा राज्यमदमत्तेन न भवितव्यम्। न चोच्चै राज्ञा स्वयं प्रज्ञपयितव्यम्। शाठ्यमानमददर्पविवर्जितेन चित्तेनायं सुवर्णप्रभासोत्तमः सूत्रेन्द्रराजः श्रोतव्यः। तस्य च धर्मभाणकस्य भिक्षोरन्तिके शास्तृसंज्ञोत्पादयितव्या। तेन मनुष्यराजेन तस्मिन्काले तस्मित्समयेऽग्रमहिषी राजपुत्राश्च राजदुहितरश्च सर्वान्तःपुरगणाश्च प्रियहिताभ्यां प्रेक्षितव्याः। प्रियवचनैश्चाग्रमहिषी राजपुत्राश्च राजदुहितरश्च सर्वान्तःपुरगणाश्च आलपयितव्याः। नानाविचित्राश्च धर्मश्रवणपूजा आज्ञापयितव्याः। अचिन्त्ययातुल्यया प्रीत्यात्मानं संतर्पयितव्यम्। अचिन्त्येन प्रीतिसुखेन सुखापयितव्यम्। सुखेन्द्रियेण च भवितव्यम्। आत्मनश्च महाबलेन भवितव्यम्। महता प्रहर्षेणात्मा प्रहर्षयितव्यः। महता प्रेमजातेन धर्मभाणकः प्रत्युत्थातव्यः॥

एवमुक्ते भगवांस्तांश्चतुरो महाराजानेतदवोचत्। तस्मिंश्च खलु पुगर्महारजाः काले तस्मिन्समये तेन मनुष्यराजेन सर्वश्वेतानि पाण्डुराणि नवरुचिवस्त्राणि प्रावरितव्यानि। नानाविभूषणालंकारैरात्मा समलंकर्तव्यं। महता राजानुभावेन महता राजव्यूहेन नानाविचित्ररत्नमङ्गलपरिगृहीतैस्ततो राजकुलादभिनिष्क्रमितव्यम्। तस्य च धर्मभाणकस्य भिक्षोः प्रत्युद्गमनाय गन्तव्यम्। तत्कस्य हेतोः ? यावन्ति मनुष्यराजस्तत्र पदानि भावयति तावन्ति कल्पकोटीनियुतशतसहस्राणि संसारात्पराङ्मुखानि करिष्यति तावतां चक्रवर्तिराजकुलकोटीनियुतशतसहस्राणां लाभी भविष्यति। यावन्ति स तत्र पदान्यतिक्रमिष्यति तावतां चैव दृष्टधार्मिकेणाचिन्त्येन महता राज्यैश्वर्येण विवर्धिष्यते। अनेककल्पकोटीनियुतशतसहस्राणामुदारोदाराणां चावस्थानानां सप्तरत्नमयानां दिव्यविमानानां लाभी भविष्यति। अनेकेषां च दिव्योदाराणां मानुष्यकाणां राजकुलपुत्रशतसहस्राणां लाभी भविष्यति। सर्वत्र च जातिषु महैश्वर्यप्राप्तो भविष्यति। दीर्घायुष्कश्च भविष्यति। चिरंजीवी च भविष्यति। प्रतिभाणवांश्चादेयवचनश्च यशस्वी च सुविशालकीर्तिश्च भविष्यति। सदेवमानुषासुरस्य लोकस्य सुखितश्च भविष्यति। उदारोदाराणां च दिव्यमानुष्यकाणां सुखानां लाभी भविष्यति। महाबलश्च महानग्नबलवेगधारी चाभिरूपः प्रासादिको दर्शनीयः परमया शुभवर्णपुष्करतया समन्वागतश्च भविष्यति। सर्वत्र जातिषु तथागतसमवधानगतो भविष्यति। सर्वकल्याणमित्राणि च प्रतिलप्स्यते। अपरिमितपुण्यस्कन्धस्य परिगृहीतो भविष्यति॥

इमन्येवंरूपाणि महाराजगुणानुशंसानि संपश्यमानेन तेन राज्ञा धर्मभाणको योजनात्प्रत्युत्थातव्यः। तस्य धर्मभाणकस्यान्तिके शास्तृसंज्ञोत्पादयितव्या। एवं चित्तमुत्पादयितव्यम्। अद्य मम

शाक्यमुनिस्तथागतोऽर्हन्सम्यक्संबुद्ध इह राजकुले प्रवेक्ष्यति। अद्य मम शाक्यमुनिस्तथागतोऽर्हन्सम्यक्संबुद्ध इह राजकुले स्वजनमनुशासिष्यते। सर्वलोकविप्रत्ययनीयं धर्मश्रवणं श्रोष्यामि। अद्याहमनेन धर्मश्रवणेनावैवर्तिको भविष्याम्यनुत्तरायां सम्यक्संबोधौ। अद्य मया तथागतकोटीनियुतशतशस्राण्यारागितानि भविष्यन्ति। अद्य मयातीतानागतप्रत्युत्पन्नानां बुद्धानां भगवतामचिन्त्या महती विपुला विस्तीर्णा पूजा कृता भविष्यति। अद्य मम नरकगतितिर्यग्योनियमलोकदुःखान्यन्तशः समुच्छिन्नानि भविष्यन्ति। अद्य मयानेकानां ब्रह्मेन्द्रराजत्वकोटीनियुतशतसहस्रात्मभावप्रतिलब्धानां कुशलमूलबीजान्यवरोपितानि भविष्यन्ति। अद्य मयानेकानां शक्रकोटीनियुतशतसहस्रात्मभावप्रतिलब्धानां कुशलमूलान्यवरोपितानि भविष्यन्ति। अद्य मयानेकानि चक्रवर्तिराजकोटीनियुतशतसहस्रात्मभावप्रतिलब्धानां कुशलमूलबीजान्यवरोपितानि भविष्यन्ति। अद्य मया सत्त्वकोटीनियुतशतसहस्राणि संसारात्परिमोचितानि भविष्यन्ति। अद्य मयाचिन्त्यसुविपुलविस्तीर्णापारमितपुण्यस्कन्धः परिगृहीतो भविष्यन्ति। अद्य मम सर्वान्तःपुरस्य महत्यारक्षा कृता भविष्यन्ति। अद्य मम राजकुलेऽचिन्त्या समबिशिष्टानुत्तरा महती शान्तिः कृता भविष्यति स्वस्त्ययनं च। अद्य ममायं सर्वविषय आरक्षितो भविष्यति। परिपालितश्चानुत्पीडितश्चानुत्कण्ठिकश्च सर्वपरचक्रानवमर्दितश्चानुपसर्गश्चानुपायासश्च भविष्यति॥

यदा च महाराजाः स मनुष्यराजोऽनेनैवंरूपेण सद्धर्मगौरवेण सुवर्णप्रभासोत्तमसूत्रेन्द्रराजधारका भिक्षुभिक्षुण्युपासकोपासिकाः सत्कुर्याद्गुरुकुर्यान्मानयेद्युष्माकं चतुर्णां महाराजानां सबलपरिवाराणां तेषां च देवगणानामनेकेषां च यक्षशतसहस्राणां महा तथा धर्माङ्गप्रत्यक्षं दद्यात् येन चैवासौ मनुष्यराजः पुण्यभिसंस्कारेण कुशलाभिसंस्कारेण च तेनैव चात्मभावेन च दृष्टधार्मिकेणाचिन्त्येन महता राज्यैश्वर्येण विवर्धयिष्यति। दृष्टधार्मिकेणाचिन्त्येन महता राजतेजसा समन्वागतो भविष्यति। श्रिया च तेजसा च लक्ष्म्या चालंकृतो भविष्यति। सर्वप्रत्यर्थिकाश्च सर्वशत्रवश्च सहधर्मेण सुनिगृहीता भविष्यन्ति॥

एवमुक्ते चत्वारो महाराजा भगवन्तमेतदवोचन्। यः कश्चिद्भदन्त भगवन्मनुष्यराजो भवेत् सोऽनेनैवंरूपेण धर्मगौरवेणेमं सुवर्णप्रभासोत्तमं सूत्रेन्द्रराजं शृणुयात्। ताश्च सूत्रेन्द्रधारका भिक्षुभिक्षुण्युपासकोपासिकाः सत्कुर्याद्गुरुकुर्यान्मानयेत्पूजयेत्। अस्माकं चतुर्णां महाराजानामर्थाय तद्राजकुलं सुशोधितं शोधयेत्। नानागन्धोदकसंसिक्तं कुर्यात्। तं च धर्मश्रावणमस्माभिश्चतुर्भिश्च महाराजैः सार्धं साधारणं शृण्यादात्मनोऽर्थाय सर्वदेवता च किंचिन्मात्रं कुशलं प्रत्यक्षं दद्यात्। समन्तरनिषण्णस्य च भदन्त भगवंस्तस्य भिक्षोर्धर्मासनगतस्य तेन मनुष्यराजेनास्माकं चतुर्णां महाराजानामर्थाय नानागन्धा धूपयितव्याः। सहधूपितेषु भदन्त भगवंस्तस्य सुवर्णप्रभासोत्तमस्य सूत्रेन्द्र-

राजस्य पूजार्थाय नानागन्धेषु नानागन्धधूपलता निश्चरन्ति। तस्मिन्नेव क्षणलवमुहूर्तेऽस्माकं चतुर्णां महाराजानां स्वकस्वकभवनगतान्युपर्यन्तरीक्षे नानागन्धधूपलताछत्राणि संस्थास्यन्ति। उदारांश्च गन्धानाघ्रास्यन्ति। सुवर्णवर्णमयाश्चावभासाः प्रादुर्भविष्यन्ति। तेन चावभासेनास्माकं भवनान्यव-भासितानि भविष्यन्ति। ब्रह्मणः सहांपतेः शक्रस्य च देवानामिन्द्रस्य सरस्वत्याश्च महादेव्या दृढायाश्च महादेव्याः श्रियश्च महादेव्याः संजयस्य च महायक्षसेनापतेरष्टाविंशतीनां च महायक्षसेनापतीनं महेश्वरस्य च देवपुत्रस्य बज्रपाणेश्च महायक्षसेनापतेर्माणिभद्रस्य च महायक्षसेनापतेर्हारीत्याश्च पञ्चपुत्रशतपरिवाराणामनवतप्तस्य च नागराजस्य चैतेषां भदन्त भगवन्स्वकस्वकभवनगतानाम्। तेन क्षणलवमुहूर्तेनोपर्यन्तरीक्षे नानागन्धधूपलताछत्राणि संस्थास्यन्ति। उदारांश्च नानागन्धानाघ्रास्यन्ति। सुवर्णवर्णमयाश्चावभासाः प्रादुर्भविष्यन्ति। तया चावभासया सर्वभवनान्यवभासितानि भविष्यन्ति॥

एवमुक्ते भगवांश्चतुरो महाराजानेतदवोचत्। न केवलं युष्माकं चतुर्णां महाराजानां स्वकस्वक-भवनगतानामुपर्यन्तरीक्षगताति नानागन्धधूपलताछत्राणि संस्थास्यन्ति। तत्कस्य हेतोः ? सहप्रधू-पिताश्च महाराजास्तेन मनुष्यराजेन नानागन्धा अस्य सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य पूजोपस्था-नाय। ततश्चैव धूपकुण्डहस्तपरिगृहीता नानागन्धधूपलता निश्चरिष्यन्ति। तेन क्षणलवमुहूर्तेन सर्व-स्यामस्यां त्रिसाहस्रमहासाहस्रायां लोकधातौ यत्र कोटीशतं चन्द्राणांकोटीशतं सुमेरूणां पर्वतराजानां कोटीशतं चक्रवाडमहाचक्रवाडानां पर्वतराजानां कोटीशतं चतुर्महाद्वीपानां कोटीशतं चतुर्महाराज-कायिकानां देवानां कोटीशतं त्रयस्त्रिंशानां देवानां कोटीशतं यावन्नैवसंज्ञायतनोपगानां देवानाम्। सर्वत्र च तेषु त्रिसाहस्रमहासाहस्रलोकधातुकोटीशतेषु त्रयस्त्रिंशेषु देवनिकायेषु सर्वेषां च देवनागयक्ष-गन्धर्वासुरगरुडकिंनरमहोरगाणां च भवनगतानां चोपर्यन्तरीक्षगतानि नानागन्धधूपलताछत्राणि संस्था-स्यन्ति। उदारांश्च नानागन्धानाघ्रास्यन्ति। सुवर्णवर्णमयाश्चावभासाः प्रादुर्भविष्यन्ति। ताभिश्चावभा-साभिः सर्वभवनान्यवभासितानि भविष्यन्ति। रत्नच्छत्राणि संस्थास्यन्ति। उदारोदाराञ्च गन्धाना-घ्रास्यन्ति सर्वदेवभवनेषु सुवर्णवर्णावभासाः प्रादुर्भविष्यन्ति। तेन चावभासेन सर्वदेवभवनान्यवभासि-तानि भविष्यन्ति। यथा त्रिसाहस्रमहासाहस्रायां लोकधातौ सर्वदेवभवनान्युपर्यन्तरीक्षे तानि नानागन्धधूपलताछत्राणि संस्थास्यन्ति। तथा चास्य महाराजाः सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य तेजसा कुण्डहस्तेन धूपितास्तेन मनुष्यराजेन नानागन्धा अस्य सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य पूजार्थाय नानागन्धधूपलताछत्राणि संस्थास्यन्ति। तेन क्षणलवमुहूर्तेन समन्ताद्दशसु दिक्ष्वनेकेषु गङ्गानदीवालुकोपमेषु बुद्धक्षेत्रकोटीनियुतशतसहस्रेष्वनेकेषां गङ्गानदीवालुकासमानां तथागतकोटीनियुत-शतसहस्राणामुपर्यन्तरीक्षे तानि नानागन्धधूपलताछत्राणि संस्थास्यन्ति। तेषु वालुकोपमेषु बुद्धकोटी-नियुतशतसहस्रेष्वुदारोदारान्नानागन्धधूपानाघ्रास्यन्ति। सुवर्णवर्णमयावभासाः प्रादुर्भविष्यन्ति। तेन चावभासेन तान्यनेकानि गङ्गानदीवालुकोपमानि बुद्धक्षेत्रकोटीनियुतशतसहस्राण्यभासितानि भवि-

ष्यन्ति। समनन्तरप्रादुर्भूतानि च महाराजा इमान्येवंरूपाणि महाप्रातिहार्याणि तान्यनेकानि गङ्गानदीवालुकासमानि बुद्धक्षेत्रकोटीनियुतशतसहस्राणि प्रतिष्ठितास्तथागतास्तं च धर्मभाणकं समन्वाहरिष्यन्ति। साधुकाराणि च प्रदास्यन्ति साधु साधु सत्पुरुष साधु पुनस्त्वं सत्पुरुष। यस्त्वमिममेवंरूपं गम्भीरमेवं गम्भीरार्थमेवं गम्भीरावभासमेवमचिन्त्यगुणधर्मसमन्वागतं सुवर्णप्रभासोत्तमं सूत्रेन्द्रराजं विस्तरेण संप्रकाशयितुकामः। न चैते सत्त्वा इतरेण कुशलमूलेन समन्वागता भविष्यन्ति। य इमं सुवर्णप्रभासोत्तमं सूत्रेन्द्रराजमन्तशः श्रोष्यन्ति, प्रागेवोद्ग्रहीष्यन्ति धारयिष्यन्ति लिखिष्यन्ति लिखापयिष्यन्ति वाचयिष्यन्ति पर्यवाप्स्यन्ति। विस्तरेण पर्षदि संप्रकाशयिष्यन्ति देशयिष्यन्त्युद्देक्ष्यन्ति स्वाध्यायिष्यन्ति योनिशो मनसि भावयिष्यन्ति। तत्कस्य हेतोः ? सहश्रवणेनास्य पुरुषस्य सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्यानेकानि बोधिसत्त्वकोटीनियुतशतसहस्राण्यवैवर्तिकानि भविष्यन्त्यनुत्तरायाः सम्यक्सबोधेः॥

अथ खलु तानि समन्ताद्दशसु दिक्षु गङ्गानदीवालुकोपमेषु बुद्धक्षेत्रकोटीनियुतशतसहस्रेष्वनेकानि तथागतकोटीनियुतशतसहस्राणि स्वकस्वकेषु बुद्धक्षेत्रेषु प्रतिष्ठितानि तेन कालेन तेन समयेनैकपादेनैकवाचैकस्वरनिर्घोषेण तस्य धर्मभाणकस्य भिक्षोर्धर्मासनगतस्यैतदूचुः। उपसंक्रमिष्यसि त्वं सत्पुरुषानागतेऽध्वनि बोधिमण्डम्। प्रदर्शयिष्यसि त्वं सत्पुरुष बोधिमण्डवराग्रगतो द्रुमराजमूलोपविष्टः सर्वत्रैलोक्यप्रतिविशिष्टानि सर्वसत्त्वांस्त्रिकालान्तराणि व्रततपश्चरणबलाधानान्यधिष्ठानान्यधिष्ठितान्यनेकानि दुष्करकल्पकोटीनियुतशतसहस्राणि समलंकरिष्यसि त्वं सत्पुरुष बोधिमण्डम्। परित्रायिष्यसि त्वं सत्पुरुष सर्वांस्त्रिसाहस्रमहासाहस्रलोकधातून्। पराजयिष्यसि त्वं सत्पुरुष द्रुमराजमूलोपविष्टः कृतिमरूपपरमबीभत्सदर्शनं नानाविकृतरूपमचिन्त्यमारसैन्यम्। अभिसंभोत्स्यसि त्वं सत्पुरुष बोधिमण्डवराग्रगतोऽनुपमप्रशान्तविरजस्कगम्भीरामनुत्तरां सम्यक्संबोधिम्। प्रवर्तयिष्यसि त्वं सत्पुरुषार्यसारदृढवज्रासनोपविष्टः सर्वजनाभिसंस्तुतं परमगम्भीरं द्वादशाकारमनुत्तरधर्मचक्रम्। पराहनिष्यसि त्वं सत्पुरुषानुत्तरं धर्मगञ्जवाद्यम्। आपूरयिष्यसि त्वं सत्पुरुषानुत्तरं महाधर्मशङ्खम्। उच्छ्रयिष्यसि त्वं सत्पुरुष महाधर्मध्वजम्। प्रज्वलयिष्यसि त्वं सत्पुरुषानुत्तरां धर्मोल्काम्। प्रवर्षयिष्यसि त्वं सत्पुरुषानुत्तरं महाधर्मवर्षम्। पराजयिष्यसि त्वं सत्पुरुषनेकानि क्लेशशतसहस्राणि। प्रतारयिष्यसि त्वं सत्पुरुषानेकानि सत्त्वकोटीनियुतशतसहस्राणि सुभीमान्महाभयसमुद्रात्। परिमोचयिष्यसि त्वं सत्पुरुषानेकानि सत्त्वकोटीनियुतशतसहस्राणि संसारचक्रात्। आरागयिष्यसि त्वं सत्पुरुषानेकानि तथागतकोटीनियुतशतसहस्राणि॥

एवमुक्ते चत्वारो महाराजा भगवन्तमेतदवोचन्। अस्य भदन्त भगवन्सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्येमान्येवंरूपाणि दृष्धार्मिकाणि मारपराजयिकानि च गुणानि संपश्यमानस्य

बुद्धसहस्रावरुप्तकुशलमूलस्य मनुष्यराजस्यानुकम्पाच्चापरिमितपुण्यस्कन्धपरिग्रहं संपश्यमानास्ते वयं भदन्त भगवंश्चत्वारो महाराजाः सबलपरिवारा अनेकैर्यक्षशतसहस्रैः सार्धं स्वभवनगता नानागन्ध-धूपलताछत्राः संचोदिताः समाना अदृश्यैरात्मभावैर्येन तस्य मनुष्यराजस्योपगतसंस्कारकूटसुशोधितं नानागन्धोदकसुसंसिक्तं नानालंकारसमलंकृतं राजकुलं तेनोपसंक्रमिष्यामो धर्मश्रवणाय। ब्रह्मा च सहांपतिः शक्रश्च देवानामिन्द्रः सरस्वती च महादेवी श्रीश्च महादेवी दृढा च पृथिवीदेवता संजयश्च महायक्षसेनापतिरष्टाविंशतिमहायक्षसेनापतयश्च महेश्वरश्च देवपुत्रो वज्रपाणिश्च गुह्यकाधिपतिर्माणि-भद्रश्च महायक्षसेनापतिर्हारीती च पञ्चपुत्रशतपरिवारा अनवतप्तश्च नागराजः सागरश्च नागराजः। अनेकानि च देवकोटीनियुतशतसहस्राण्यदृश्यैरात्मभावैर्येन तस्य मनुष्यराजस्य तत्र त नानालंकार-समलंकृतं राजकुलं यत्र तस्य धर्मभाणकस्य भिक्षोः पुष्पाभिकीर्णायां धरण्यां शौचप्रगृहीतं नाना-लंकारसमलंकृतं यत्र यत्र धर्मभाणकस्य भिक्षोः पुष्पाभिकीर्णायं धरण्यां शौचप्रगृहीतं नानालंकार-समलंकृतं यत्र यत्र धर्मासनं प्रज्ञप्तं तत्र भविष्यन्ति धर्मश्रवणाय ॥

ते वयं भदन्त भगवंश्चत्वारो महाराजा अनेकैर्यक्षशतसहस्रैरेभिश्च सर्वैः सार्धं समग्रा भविष्या-मस्तस्य मनुष्यराजस्य कल्याणमित्रसहायकस्य कल्याणसंप्रापकस्यानुत्तरमहारसोदारदातुरनेन धर्मा-मृतरसेन संतर्पिताः संतर्प्य तस्य मनुष्यराजस्यारक्षां करिष्यामः। परित्राणं परिग्रहं परिपालनं शान्ति-स्वस्त्ययनं करिष्यामः। तस्य राजकुलस्य च नगरस्य च विषयस्य च रक्षां करिष्यामः। परित्राणं परिग्रहं परिपालनं शान्तिस्वस्त्ययनं करिष्यामं। तच्च विषयं सर्वोपद्रवोपसर्गोपायासेभ्यः परिमोच-यिष्याम इति ॥

यः कश्चिद्भदन्त भगवन्मनुष्यराजो भवेत्। यस्य च मनुष्यराजस्य विषयेऽयं सूत्रेन्द्रराजं संप्रचरेत्। यदा चासौ भदन्त भगवन्मनुष्यराजः सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य धारकान् भिक्षु-भिक्षुण्युपासकोपासिका न सत्कुर्यान्न गुरुकुर्यान्न मानयेन्न पूजयेत्। अस्माकं चतुर्णां महाराजा-नामनेकानि यक्षकोटीनियुतशतसहस्राण्यनेन धर्मश्रवणेनैनेन धर्मामृतरसेन न संतर्पयेरन्न प्रतिमान-येरन्। इमानि दिव्यात्मभावानि महता तेजसा न विवर्धयेन्न चास्माकं वीर्यं च बलं च संजनयेत्। तेजश्च श्रियश्च लक्ष्मीं चास्माकं कायेषु न विवर्धयेत्। न तेऽपि वयं भदन्त भगवंश्चत्वारो महाराजाः सबलपरिवारा अनेकैर्यक्षकोटीनियुतशतसहस्रैस्तस्य च विषये रक्षां करिष्यामः। भदन्त भगवन्विषय-मस्माकमुपेक्षन्तः सर्वविषयवासिनो देवगणास्तं विषयमुपेक्ष्यन्ति। देवताश्च भदन्त भगवन्तं विषय-मुपेक्ष्यन्ते ॥

तत्र तत्र विषये नानाविधा विषयलोपा भविष्यन्ति। दारुणानि च राजसंक्षोभानि भविष्यन्ति। सर्वविषयगतानि च सत्त्वानि कलहजातानि भविष्यन्ति। भण्डनजातानि विगृहीतानि विवादमापन्नानि

नानाविधाश्च ग्रहरोगा विषये प्रादुर्भाविष्यन्ति। नानादिग्भ्य आगताश्चोल्कापाताः प्रादुर्भविष्यन्ति। ग्रहनक्षत्राणि च परस्परेण विरुद्धानि भविष्यन्ति। सूर्यप्रतिरूपकाणि शशिन उत्पादयिष्यन्ति। चन्द्रग्रहाश्च भविष्यन्ति। सूर्यग्रहाश्च सततसमितं गगनान्तरगतौ सूर्यचन्द्रमसौ नो दृक्यथगतौ भविष्यतः। उल्कापातसदृशवर्णानि परिवेशकानि गगनान्तरे कालेन कालं प्रादुर्भविष्यन्ति। पृथिवीकम्पाश्च भविष्यन्ति। कूपाश्च पृथिवीगताः संक्षेपन्तः शोक्ष्यन्ति। विषमवाताश्च वास्यन्ति। विषमवर्षाश्च भविष्यन्ति। दुर्भिक्षकान्तारश्च सर्वविषये भविष्यति। परचक्राणि च तद्विषयं वेक्ष्यन्ति। आयासबहुलं भविष्यति। तेषामस्माकं भदन्त भगवंश्चतुर्णां महाराजानां सबलपरिवाराणामनेकेषां च यक्षशतसहस्राणां विषयवासिनां च देवनागानां तं विषयमुपेक्षतस्तत्र विषय इमान्येवं रूपाणि नानाविधान्युपद्रवशतानि भविष्यन्त्युपद्रसहस्राणि वा॥

यं कश्चिद्भदन्त भगवन्मनुष्यराजो भवेत्। य आत्मनो महतीमारक्षां कर्तुकामो भवेत्। चिरं च नानाविधानि राजसौख्यान्यनुभवितुकामो भवेत्। सर्वसुखसमर्पितो न चिरेण राजत्वं कर्तुकामो भवेत्। सर्वविषयवासिनां च सत्त्वानां सुखापयितुकामो भवेत्। सर्वपरचक्राणि च पराजयितुकामो भवेत्। सर्वसुखेन विषयं परिपालयितुकामो भवेत्। धर्मेण राजत्वं कारयितुकामो भवेत्। स्वविषयं च सर्वभयोपद्रवोपसर्गोपायासेभ्यः परिमोचयितुकामो भवेत्॥

तेन च भदन्त भगवन्मनुष्यराजेनायं सुवर्णप्रभासोत्तमः सूत्रेन्द्रराजः श्रोतव्यः। श्रुत्वा चैतास्तद्धारका भिक्षुभिक्षुण्युपासकोपासिकाः सत्कर्तव्या गुरुकर्तव्या मानयितव्याः पूजयितव्याः। वयं चत्वारो महाराजाः सबलपरिवारा अनेनैव धर्मश्रवणकुशलमूलोपचयेनानेन धर्माकृतरसेन संतर्पयितव्याः। अस्माकं चेमानि दिव्यात्मभावानि महातेजसा विवर्धयितव्यानि। तत्कस्य हतोः ? यद्भदन्त भगवंस्तेन मनुष्यराजेनावश्यमयं सुवर्णप्रभासोत्तमः सूत्रेन्द्रराजः श्रोतव्यः॥

यावन्ति भदन्त भगवन्ब्रह्मेन्द्रेण लौकिकलोकोत्तराणि च नानाविधानि शास्त्राण्युपदर्शितानि। यावन्ति च शक्रेण देवेन्द्रेण नानाविधानि शास्त्राण्युपदर्शितानि। यावन्ति च नानाविधैः पञ्चभिज्ञै ऋषिभिर्लौकिकलोकोत्तराणि च सत्त्वानामर्थाय शास्त्राण्युपदर्शितानि। भदन्त भगवंस्तेभ्यो ब्रह्मेन्द्रशतसहस्रेभ्योऽनेकेभ्यश्च शक्रकोटीनियुतशतसहस्रेभ्यः सर्वेभ्यश्च पञ्चाभिज्ञेभ्य ऋषिकोटीनियुतशतसहस्रेभ्यस्तथागतोऽग्रतरश्च विशिष्टतरश्चेमं सुवर्णप्रभासोत्तमसूत्रेन्द्रराजं विस्तरेण सत्त्वानामर्थाय संप्रकाशयितः॥

यथायं सर्वजम्बुद्वीपगतानां मनुष्यराजानां राजत्वं कारयितव्यम्। यथा च सर्वसत्त्वानि सुखार्पितानि भविष्यन्ति। यथा च सर्वविषयानुत्पीडिताश्च भविष्यन्त्यकण्टकाः। यथा परचक्राणि पराजि-

तानि भविष्यन्ति। पराङ्मुखीभूतानि। यथा च ते विषया अनुपायासाश्च। यथा च सर्वविषयधर्मा अनुपायासाश्च भविष्यन्त्यनुपद्रुताश्च। यथा च तैर्मनुष्यराजैः स्वेषु विषयेषु महती धर्मोल्काः प्रज्वलिता भविष्यन्त्यादीपिताश्च। यथा च सर्वदेवताभवनानि आदीपितानि भविष्यन्ति देवैर्देवपुत्रैश्च। यथ च वयं चत्वारो महाराजाः सबलपरिवारा अनेकानि यक्षशतसहस्राणि सर्वजम्बुद्वीपगताश्च देवगणाः संतर्पिता भविष्यन्ति संप्रसादिताश्च। यथा चास्माकं काये महान्तं वीर्यं च बलं च स्थाम च संजनितं भविष्यन्ति। यथा चास्माकं काये तेजश्च श्रीश्च लक्ष्मीश्च भूयस्या मात्रयाभिनिचिशन्ति। यथा च सर्वजम्बुद्वीपः सुभिक्षो भविष्यति रमणीयश्च बहुजनाकीर्णमनुष्यश्च। यथा च सर्वजम्बुद्वीपगतानि सत्त्वानि सर्वसुखानि भविष्यन्ति। नानारतिमनुभविष्यन्ति। यथा च सत्त्वान्यनेककल्पकोटीनियुत-शतसहस्राण्ययिन्त्यान्युदारोदाराणि सुखान्यनुभविष्यन्ति। बुद्धैश्च भगवद्भिः सार्धं समवधानगतानि भविष्यन्ति। अनागतेऽध्वन्यनुत्तरां सम्यक्संबोधिमभिसंभोत्स्यन्ते। तत्सर्वमेतर्हि भगवता तथागते-नार्हता सम्यक्संबुद्धेन महता कारुण्यबलाधिष्ठानेन शक्रकोटीनियुतशतसहस्राणि दिव्यातिरेकतरेऽनुत्तरे तथागतज्ञाने नानाविधानेकसर्वपश्चाभिज्ञर्षिगणकोटीनियुतशतसहस्राणि चातिरेकसम्यक्संबुद्धेन ब्रह्मेन्द्र-कोटीनियुतशतसहस्राणि चातिरेकव्रततपोऽधिष्ठानेन स भगवता तथागतोनार्हता सम्यक्संबुद्धेनायं सुवर्णप्रभासोत्तमः सूत्रेन्द्रराजो विस्तरेण सर्वसत्त्वानामर्थायेह जम्बुद्वीपे संप्रकाशितः॥

तेन मनुष्यराजेन सर्वजम्बुद्वीपगतानि लौकिकलोकोत्तराणि राजकार्याणि राजशास्त्राणि राज-करणानि निर्यातानि। यैरिमे सत्त्वाः सुखिनो भविष्यन्ति। तानि सर्वाणि भगवता तथागतेनार्हता सम्यक्संबुद्धेनायं सुवर्णप्रभासोत्तमसूत्रेन्द्रराज उपदर्शितः परिदीपितः संप्रकाशितः। तेन भदन्त भगवन्हेतुना तेन प्रत्ययेन च तेन मनुष्यराजेनावश्यमायं सुवर्णप्रभासोत्तमः सूत्रेन्द्रराजः सत्कृत्य श्रोतव्यः सत्कृत्य मानयितव्यः सत्कृत्य पूजयितव्यः॥

एवमुक्ते भगवांश्चतुरो महाराजानेतदवोचत्। तेन हि चत्वारो महाराजाः सबलपरिवारा अवश्यं तेषां मनुष्यराजानामस्य सुवर्णप्रभासोत्तमय सूत्रेन्द्रराजस्य श्रोतृणां पूजयितृणां महान्तमौत्सुक्यं करिष्यन्ति रक्षार्थम् एताश्च महाराजाः सूत्रेन्द्रधारका भिक्षुभिक्षुण्युपासकोपासिका बुद्धक्षेत्रमारात्प्रदर्शन्ते देवमानुषासुरस्य लोकस्य बुद्धकृत्यानि करिष्यन्ति। इमं सुवर्णप्रभासोत्तमं सूत्रेन्द्रराजं विस्तरेण संप्रकाशयिष्यन्ति। अवश्यं युष्माभिश्चतुर्भिर्महाराजैस्तेषां सूत्रेन्द्रेधारकाणां भिक्षुभिक्षुण्युपासको-पासिकानामारक्षा कर्तव्या। परिपालनं परित्राणं परिग्रहं दण्डपरिहारं शस्त्रपरिहारं शान्तिस्वस्त्ययनं कर्तव्यम्। यथा च सूत्रेन्द्रधारका भिक्षुभिक्षुण्युपासकोपासिका आरक्षिता भवेयुरनुत्पीडिता अनुसर्गो-पायासां सुखचित्ताः। इमं सुवर्णप्रभासोत्तमसूत्रेन्द्रराजं विस्तरेण सत्त्वानां संप्रकाशयितुम्॥

अथ खलु वैश्रवणो महाराजो धृतराष्ट्रो महाराजो विरूढको महाराजो विरूपाक्षो महाराजोत्थाया-सनेभ्य एकांसानि चीवराणि प्रावृत्योत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणम्य तस्यां वेलायामभिमुखं सारूप्याभिर्गाथाभिर्भगवन्तमभितुष्टुवुः ॥

जिनचन्द्रविमलवपुषं जिनसूर्यसहस्रकिरणाभम्।
जिनकमलविमलनेत्रं जिनकुमुदतुषारविरजदशनाग्रम्॥ १॥

जिनगुणसागरकल्प अनेकरत्नाकर जिनसमुद्रम्।
ज्ञानाम्बुसलिलपूर्णं समाधिशतसहस्रसंकीर्णम्॥ २॥

जिनचरणचक्रचित्रं समन्तनेभिस्तथा सहस्राभम्।
करचरणजालचित्रं हंसेन्द्र यथा चरणजालम्॥ ३॥

काञ्चनगिरिप्रकाशं सुवर्णकनकामलं जिनगिरीन्द्रम्।
सर्वगुणमेरुकल्पं बुद्धगिरीन्द्रजिन नमस्यामः॥ ४॥

आकाशचन्द्रसदृशमुदकचन्द्रनिभं तथागतशशाङ्कम्।
मायामरीचिकल्प विमलजिन नमस्यामः॥ ५॥

अथ खलु भगवांश्चतुरो महाराजान्गाथाभिर्बभाषे॥

अयं-

सुत्रेन्द्रराजप्रवरः सुवर्णप्रभासोत्तमो दशबलानाम्।
युष्माभि लोकपालैः पालयितव्यम् ॥ ६॥

येनायं सूत्ररतनगम्भीरः सर्वसत्त्व सुखदाता।
सत्त्वान हितसुखार्थं चिरं च प्रचरेज्जम्बूद्वीपेऽस्मिन्॥ ७॥

ये च तृसाहस्रमहासाहस्रे लोकधातौ हि।
सत्त्वा अपायदुःखा शमयित्वा नरकदुःखानि॥ ८॥

ये चेह जम्बुद्विपे गता हि सर्वे
राजानस्तु महतः प्रहर्षजाता।
धर्मेण च पालयन्तु विषया
येनायं जम्बूद्वीपः क्षेमश्च भवेत्॥ ९॥

सूभिक्षो रमणीयः सर्वे जम्बूद्वीपे
सुखितानि भवन्ति सर्वसत्त्वानि।
यस्या नास्ति नरपतेर्विषये
प्रियात्मसौख्य प्रयता च राजत्वम्॥ १०॥

ऐश्वर्यं प्रियता च श्रोतव्यस्तेन
सूत्रराजः परमशत्रुक्षयकरम्।
परचक्रनिवर्तनकरपरमभयव्यसहारः
परमशुभकरोऽयं सूत्रेन्द्रराज॥ ११॥

यथा रत्नवृक्षः सुरुचिरस्तु
सर्वगुणसंभवः सुगृहः संस्थः।
तथैवायं सूत्रेन्द्रराज
द्रष्टव्यो राजगुणादीनाम्॥ १२॥

यथा शीतलहिमसलिलं धर्मतं
प्रतिलभत उष्ण अपहरणम्।
तथैवायं सूत्रवरेन्द्रो गुणसुखदाता
भवति नरपतीनाम्॥ १३॥

यथैव हि रत्नकरण्डः सर्वरत्नाकरः करतलस्थः।
तथैवायं सूत्रेन्द्रराज स्वर्णप्रभासोत्तमो नृपगणानाम्॥ १४॥

देवगण अर्चितोऽयं देवेन्द्रनमस्कृतश्च सूत्रेन्द्रः।
आरक्षितश्चतुर्भिर्महर्द्धिकैर्लोकपालैश्च॥ १५॥

बुद्धैर्हि दशदिशस्थैः सदा समन्वाहृतोऽयं सूत्रेन्द्रः।
सूत्रमिदं देशयतः साधूकार ददन्ति संबुद्धाः॥ १६॥

यक्षशतसहस्राणी रक्षन्ति च विषयं दशसु दिशासु।
शृण्वन्ति सूत्रेन्द्रमिमं प्रमुदितचित्ताः प्रहृष्टाश्च॥ १७॥

जम्बुद्वीपगतानि विविक्तानि देवगणानि।
ते सर्वे देवगणाः शृण्वन्तु सूत्रमिदं प्रमुदिताश्च॥ १८॥

तेजोबलं वीर्यबलं च लभन्ते तेन धर्मश्रवणेन।
महतौजसा च देवां कायान्विवर्धयिष्यन्ति॥ १९॥

अथ खलु चत्वारो महाराजा भगवतोऽन्तिकादिमा एवंरूपा गाथाः श्रुत्वाश्चर्यप्राप्ता बभूवुरद्भुतप्राप्ता उद्विल्यप्राप्तास्तद्धर्मवेगेन मुहूर्तमात्रं प्ररुदिता इवाश्रूणि च प्रवर्तयामासुः। ते च संमानैः शरीरै प्रफुल्लि-भिरङ्गप्रत्यङ्गैरचिन्त्येन प्रीतिसुखसौमनस्येन समन्वागता भूत्वा पुनरपि भगवन्तं दिव्यमान्दारवैः कुसुमै-रवकिरन्ति स्म। अवकिरित्वा प्रकिरित्वोत्थायासनेभ्य एकांसानि चीवराणि प्रावरित्वा दक्षिणानि जानु-मण्डलानि पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तमेतदवोचन्। वयमपि भदन्त भगवंश्चत्वारो महाराजा एकैको महाराजो वयं पञ्चयक्षशतपरिवारा धर्ममाणकस्य भिक्षोः सदानुबद्धा भविष्यामस्तं धर्मभाणकं मानयनाय परिपालनाय चेति॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजो चतुर्महाराजपरिवर्तो नाम सप्तमः॥

# ॥ सरस्वतीदेवीपरिवर्तः ॥

अथ खलु सरस्वती महादेव्येकांसं चीवरं प्रावृत्य दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तमेतदवोचत्। अहमपि भदन्त भगवन् सरस्वती महादेवी तस्य धर्मभाणकस्य भिक्षोर्वाक्परिभूषणार्थाय प्रतिभाणकमुपसंहरिष्यामि। धारणीं चानुप्रदास्यामि। सुनि-रुक्तवराणां भावं संभावयिष्यामि। महान्तं च धर्मभाणकस्य भिक्षोर्ज्ञानावभासं करिष्यामि। यानि कानि चित्पदव्यञ्जनानीतः सुवर्णप्रभासोत्तमसूत्रेन्द्रराजात्परिभ्रष्टानि भविष्यन्ति। विस्मरितानि च तान्यहं सर्वाणि तस्य धर्मभाणकस्य भिक्षोः सुनिरुक्तपदव्यञ्जनान्युपसंहरिष्यामि। धारणीं चानु-प्रदास्यामि स्मृत्यसंप्रमोषणाय। यथा चायं सुवर्णप्रभासोत्तमः सूत्रेन्द्रराजस्तेषां बुद्धसहस्रावरुप्त-कुशलमूलानां सत्त्वानामर्थाय चिरं जम्बुद्वीपे प्रचरेत्। न च क्षिप्रमन्तर्धापयेत्। अनेकानि च सत्त्वानीमं सुवर्णप्रभासोत्तमं सूत्रेन्द्रराजं श्रुत्वा चिन्त्य तीक्ष्णप्रज्ञा भवेयुः। अचिन्त्यं च ज्ञानस्कन्धं प्रतिलभन्ते च न दुष्टमेव चायुः। सम्पत्तिं प्रतिलभेयुः। जात्यनुग्रहं चापरिमितं च पुण्यस्कन्धं प्रतिगृह्णीयुः। सर्वशास्त्रकुशलाश्च भवेयुर्नानाशिल्पविधिज्ञाश्च॥

तदिदं संयुक्तं स्नानकर्म भाषिष्यामि तस्य धर्मभाणकस्य भिक्षोस्तेषां च धर्मश्रवणिकानां सत्त्वानामर्थाय। सर्वग्रहनक्षत्रजन्ममरणपीडा कलिकलहकलुषडिम्बडमरदुःखप्रविषोदकपीडाः। सर्वकाखोर्दवेतालाः प्रशमं यास्यन्ति।

औषधयो मन्त्रा येन स्नापयन्ति च पण्डिताः।
वचा गोरोचना स्पृका शिरीषं श्याम्यकं शमी।
इन्द्रहस्ता महाभागा व्यामकमगरुः त्वचम्॥ १॥

नीवेष्टकं सर्जरसं सिह्लकं गुल्गुलूरसम्।
तगरं पत्रशैलेयं चन्दनं च मनःशिला॥ २॥

समोचकं तुरुष्कं च कुङ्कुमं मुस्त सर्षपाः।
नरदं चव्य सूक्ष्मेला उशीरं नागकेशरम्॥ ३॥

एतानि समभागानि पुष्यनक्षत्रेण पीषयेत्।
इमैर्मन्त्रपदैश्चूर्णं शतधा चाभिमन्त्रयेत्॥ ४॥

तद्यथा। सुकृते करजातभागे हंसरण्डे इन्द्रजालमलिलक उपसदे अवतासिके कुत्र कुकलविमलमति शीलमति संधिबुधमति शिशिरि सत्यस्थित स्वाहा॥

गोमयमण्डलं कृत्वा मुक्तपुष्पाणि स्थापयेत्।
सुवर्णभाण्डे रूप्यभाण्डे मधुरेण स्थापयेत्॥ ५॥

वर्मिताश्च पुरुषास्ते चत्वारि तत्र स्थापयेत्।
कन्याः सुभूषिताः न्यस्ताश्चत्वारो घटधारिण्यः॥ ६॥

गुग्गुलुं धूपयन्नित्यं पञ्चतूर्याणि योजयेत्।
छत्रध्वजपताकैश्च सा देवी समलङ्कृता॥ ७॥

आदर्शनपर्यन्ताश्च शरशक्तीर्नियोजयेत्।
सीमाबन्धं ततः कुर्यात्पश्चात्कार्यं समारभेत्।
अनेन मन्त्रपदक्रमेण सीमाबन्धं समारभेत्॥ ८॥

स्याद्यथेदम्। अने नयने हिलि हिलि गिलि खिले स्वाहा॥ भगवतः पृष्ठतः स्नात्वानेन मन्त्रजापेन स्नानशान्तिं योजयेत्। तद्यथा। सुगते विगते विगतावति स्वाहा।

ये प्रस्थिता नक्षत्रा आयुः पालयन्तु चतुर्दिशे।
नक्षत्रजन्मपीडा वा राशिकर्मभयावहम्।
धातुसंक्षोभसंभूता शाम्यन्तु भयदारुणा॥ ९॥

समे विषमे स्वाहा। सुगते स्वाहा। सागरसंभूताय स्वाहा॥ स्कन्धमारुताय स्वाहा। नीलकण्ठाय स्वाहा। अपराहितवीर्याय स्वाहा। हिमवत्संभूताय स्वाहा। अनिमिषचक्राय स्वाहा। नमो भगवत्यै ब्राह्मण्यै नमः सरस्वत्यै देव्यै सिध्यन्तु मन्त्रपदास्तं ब्रह्म नमस्यन्तु स्वाहा।

एतेन स्नानकर्मणा तस्य धर्मभाणकस्य भक्षोरर्थाय तेषां च धर्मश्रवणिकानां लेखकानामार्थाय स्वयमेवाहं तत्र गगणसिद्धयक्षदेवगणैः सार्धं तत्र च ग्रामे वा नगरे वा निगमे वा विहारे वा सर्वतो रोगप्रशमनं करिष्यामि। सर्वग्रहकलिकलुषनक्षत्रजन्मपीडान्वा दुःखस्वप्नविनायकपीडान्सर्वकाखोर्द-

वेतालान्प्रशमयिष्यामि। यथा तेषां सूत्रेन्द्रधारकाणां भिक्षुभिक्षुण्युपासकोपासिकानां जीवितानुग्रहो भवेत्। संसारनिर्वाणं प्रतिलभेयुः। अवैवर्तिकाश्च भवेयुरनुत्तरायाः सम्यक् संबोधेः॥

अथ खलु भगवान्सरस्वत्यै महादेव्यै साधुकारमदात्। साधु साधु सरस्वति महादेवि बहुजन-हिताय बहुजनसुखाय प्रतिपन्नो यत्त्वया हीमानि मन्त्रोषधिसंयुक्तानि भाषितानि। सा च सरस्वती महादेवी भगवतः पादावभिवन्दनां कृत्वैकान्ते निषण्णा॥

अथ खल्वाचार्यव्याकरणप्राप्तः कौण्डिन्यो महाब्राह्मणस्तां सरस्वतीमावाहयति स्म॥

सरस्वती महादेवी पूजनीया महत्तपाः।
विख्याता सर्वलोकेषु वरदाता महागुणा॥ १०॥

शिखरे समाश्रिता कान्ता दर्भचीवरवासिनी।
शुभवस्त्रं धारयति एकपादेन तिष्ठति॥ ११॥

सर्वदेवाः समागम्य तां सूत्रवचनं त्विदम्।
जिह्वाभिमुखं च सत्त्वानां भाषन्तु वचनं शुभम्॥ १२॥

स्याद्यथेदम्। सुरे विरे अरजे अरजवति हि गुले पिङ्गले पिङ्गले वतिमुखे मरीचिसुमति दिशमति अग्रामग्रीतलवितले च वडिविचरी मरिणिपाणये लोकज्येष्ठके प्रियसिद्धिव्रते भीममुखिशचिवरी अप्रति-हते अप्रतिहतबुद्धि नमुचि नमुचि महादेवि प्रतिगृह्ण नमस्कार। सर्वसत्त्वानां बुद्धिरप्रतिहता भवतु विद्या मे सिद्ध्यतु शास्त्रलोकतन्त्रपिटककाव्यादिषु। तद्यथा। महाप्रभावे हिलि हिलि मिलि मिलि। विचरतु मम विचरतु मे माया सर्वसत्त्वानां च भगवत्या देव्याः सरस्वत्या अनुभावेन कदारके युवति हिलि मिलि आवाहयामि महादेवि बुद्धसत्येन धर्मसत्येन संघसत्येन इन्द्रसत्येन वरुणसत्येन ये लोके सत्यवादिनः सन्ति। तेन तेषां सत्यवचेन आवाहयामि महादेवि। हिलि हिलि मिलि विचरन्तु मम मन्त्रिनो माया सर्वसत्त्वानाम्। नमो भगवत्यै सरस्वत्यै सिद्ध्यन्तु मन्त्रपदाः स्वाहा॥

अथाचार्यव्याकरणप्राप्तः कौडिन्यो महाब्राह्मणः सरस्वतीं महादेवीमिमाभिर्गाथाभिरभ्यस्तावीत्॥

शृण्वन्तु मे भूतगणा हि सर्वे
स्तोष्यामि देवीं प्रवरोत्तमचारुवक्राम्।

या मातृग्रामे प्रवराग्रदेवी ।
सदेवगन्धर्वसुरेन्द्रलोके ॥ १३ ॥

नानाविचित्रा समलंकृताङ्गा
सरस्वती नाम विशालनेत्रा ।
पुण्योज्ज्वला ज्ञानगुणैर्विकीर्णा
नानाविचित्रोत्तमदर्शनीया ॥ १४ ॥

स्तोष्यामि तां वाक्यगुणैर्विशिष्टैः
सिद्धिकरायै प्रवरोत्तमायै ।
प्रशस्तभूताय गुणाकरायै
विमलोत्तमायै कमलोज्ज्वलायै ॥ १५ ॥

सुलोचनायै नयनोत्तमायै
शुभाश्रयायै शुभदेशनायै ।
गुणैरचिन्त्यैः समलंकृतायै ।
चन्द्रोपमायै विमलप्रभायै ॥ १६ ॥

ज्ञानाकरायै स्मृतिसमग्रतायै
सिंहोत्तमायै नरवाहनायै ।
रत्नमणिबाहुसमलंकृतायै
पूर्णशशाङ्कोपमदर्शनायै ॥ १७ ॥

मनोज्ञवाक्याय मृदुस्वरायै
गम्भीरप्रज्ञाय समन्वितायै ।
कार्याग्रसाधनसुसत्त्वतायै
देवासुरैर्वन्दितपूजितायै ।
सर्वसुरासुरगणालयवन्दितायै
भूतगणैः सदा संपूजितायै ॥ १८ ॥ नमः स्वाहा ॥

हेऽहं देवि नमस्ते
सा मे प्रयच्छतु गुण औघम्॥
सर्वे सत्त्वा विशिष्ट-
सिद्धिं प्रददातु सर्वकार्या।
नित्यं च रक्षतू मां
सर्वान्सत्त्वांश्च शत्रुमध्ये॥ १९॥

एतान् समाप्ताक्षरपूर्णवाक्यान्
कल्यं समुत्थाय पठेत्सुवीर्यः।
सर्वाभिप्राये धनधान्यलाभी
सिद्धिं च प्राप्नोति शिवामुदारामिति॥ २०॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे सरस्वतीदेवीपरिवर्तो नामाष्टमः।

## ॥ श्रीमहादेवीपरिवर्तः ॥

अथ खलु श्रीर्महादेवी भगवन्तं प्रणम्यैतदवोचत्। अहमपि भदन्त भगवन्भगवती श्रीर्महादेवी तस्य धर्मभाणकस्य भिक्षोरौत्सुक्यतां करिष्यामि। यदिदं चीवरपिण्डपातशयनासनग्लानप्रत्ययभैषज्य-परिष्कारैरन्यैश्चोपकरणैर्यथा स धर्मभाणकः सर्वोपकरणसंपन्नो भविष्यति। अवैकल्पतां च प्रति-लप्स्यते। स्वस्थचित्तो भविष्यति। सुखचित्तो रात्रिं दिवा प्रतिनामयिष्यति। इतश्च सुवर्णप्रभासो-त्तमात्सूत्रेन्द्रराजान्नानाविधानि पदव्यञ्जनान्युपनामयिष्यति। व्युपपरीक्षिष्यति। येनायं सुवर्णप्रभासो-त्तमः सूत्रेन्द्रराजस्तेषां बुद्धसहस्रावरुप्तकुशलमूलानां सत्त्वानामर्थाय चिरं जम्बुद्वीपे प्रचतिष्यति । न च क्षिप्रमन्तर्धास्यति। सन्ति सत्त्वाः सुवर्णप्रभासोत्तमं सूत्रेन्द्रराजं शृणुयुः। अनेकानि च कल्पकोटी-नियुतशतसहस्राण्यचिन्त्यानि दिव्यमानुष्यकानि सुखानि प्रत्यनुभवेयुः। दुर्भिक्षश्चान्तर्धापयेत्। सुभिक्षश्च प्रादुर्भवेत्। सत्त्वाश्च मनुष्यसुखोपधानेन सुखिता भवेयुः। तथागतसमवधानगताश्च भवेयुः। अना-गतेऽध्वति चानुत्तरां सम्यक्संबोधिमभिसंबोधयेयुः। सर्वनरकतिर्यग्योनियमलोकदुःखान्यत्यन्तसमु-च्छिन्नानि भवेयुरिति॥

रत्नकुसुमगुणसागरवैडूर्यकनकगिरिसुवर्णकाञ्चनप्रभासश्रीर्नाम तथागतोऽर्हन् सम्यक्संबुद्धः। यत्र श्रिया महादेव्या मया कुशलमूलमवरुप्तम्। येनैतर्हि यां यां दिशं सत्त्वानां विहरति। यां यां दिशं सत्त्वान्यवलोकयति। यां यां दिशमुपसंक्रमति। तस्यां तस्यां दिश्यनेकानि सत्त्वकोटीनियुतशत-सहस्राणि सर्वसुखोपधानेन सुखितानि भविष्यन्ति। अवैकल्पतां च प्रतिलप्स्यन्ते। अन्नेन वा पानेन वा धनेन वा धान्येन वा हिरण्यसुवर्णमणिमुक्तवैडूर्यशङ्खशिलाप्रवालजातरूपरजतादिभिरन्यैश्चोपकरणैः सर्वोपकरणसमृद्धानि सत्त्वानि भविष्यन्ति श्रियो महादेव्याः प्रभावेन। तस्य च तथागतस्य पूजा कर्तव्या। गन्धाश्च पुष्पाश्च धूपाश्च दीपाश्च दातव्याः। श्रियो देव्यास्त्रिष्कृतो नामधेयमुच्चारयितव्यम्। तस्याश्च गन्धं पुष्पं धूपं दीपं दातव्यम्। रसविहारा निक्षेप्तव्यानि। तस्य महाद्रव्यराशिर्विवर्धते। तत्रेदमुच्यते॥

विवर्धत धरणी रसो धरण्या प्रहर्षिता।
भोन्ति च देवता सदा फलशस्यचितोपमम्॥
वृक्षदेवता रोहन्ति शस्यानि सुचित्रभावाः॥ १॥

सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य नामधेयमुच्चारयितव्यम्। तान्सत्त्वाञ्छ्रीर्महादेवीसमन्वाहरि-ष्यति। तेषां च महतीं श्रियं करिष्यति॥

अलकावत्यां राजधान्यां पुण्यकुसुमप्रभोद्यानवने सुवर्णवर्णध्वजनाम्नि सप्तरत्नप्रभवने श्रीर्महादेवी प्रतिवसति स्म। यः कश्चित्पुरुषो धान्यराशिं विवर्धयितुकामो भवेत्। तेन स्वगृहं सुशोधयितव्यम्। शुचिश्वेतवस्त्रप्रावृतेन सुगन्धवसनधारिणा भवितव्यम्। नमस्तस्य भगवतो रत्नकुसुमगुणसागरवैडूर्य-कनकगिरिसुवर्णकाञ्चनप्रभासश्रियस्तथागतस्यार्हतः सम्यक्सम्बुद्धस्य त्रिष्कृत्वो नामधेयमुच्चारयित-व्यम्। श्रिया महादेव्या हस्तेन तस्य पूजा कर्तव्या। पुष्पधूपगन्धाश्च दातव्याः। नानारसविहाराश्च निक्षेप्तव्याः। तस्य च सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्यानुभावेन तेन कालेन श्रीर्महादेवी तस्य गृह समन्वाहरिष्यति। तस्य च महाधान्यराशिं विवर्धयिष्यति। तेन श्रीर्महादेवीमावाहयितुकामेनेमे विद्या-मन्त्राः स्मरयितव्याः। तद्यथा। नमः सर्वबुद्धानामतीतानागतप्रत्युत्पन्नानाम्। नमः सर्वबुद्धबोधि-सत्त्वानाम्। नमो मैत्रेयप्रभृतीनां बोधिसत्त्वानाम्। तेषां नमस्कृत्य विद्यां प्रयोजयामि इयं मे विद्या समृध्यतु। स्याद्यथेदम्। प्रतिपूर्णवरे समन्तगते। महाकार्यप्रतिप्रापणे सत्त्वार्थसमतानुप्रपुरे। आयान-धर्मिता महाभागिने। महातेजोपमं हिते। ऋषिसंगृहीते। समयानुपालने॥

इमे मूर्धाभिषेकधर्मता मन्त्रपदाः। एका शशिपदा अविसंवादना मन्त्रपदाः। समवधारिभिरवरुप्त-कुशलमूलैः प्रावृतधारयमाणैः स सप्तवर्षा अष्टाङ्गोपेता सपञ्चासिन पूर्वाह्णे। अपराह्णे। सर्वबुद्धानां भगवतां पुष्पधूपगन्धपूजां कृत्वात्मनश्च सर्वसत्त्वानां च सर्वज्ञज्ञानस्य परिपूरणाय। तेन सर्वे चाभिप्रायाः समृध्यन्तु॥ क्षिप्रं समृध्यन्तु। तद्गृहं स चौक्षं कृत्वा विहारं चारण्यायतनं वां गोमयेन मण्डलकं कृत्वा गन्धपुष्पधूपं च दातव्यम्। चौक्षमासनं प्रज्ञपयितव्यम्। पुष्पा अवकीर्णन्तु मितव्यम्। ततस्तत्क्षणं श्रीर्महादेवी प्रविशित्वा तत्र स्थास्यति। तदुपादाय तत्र गृहे वा ग्रामे वा नगरे वा निगमे वा विहारे वारण्यायतने वा न जातु केनचिद्वैकल्पं करिष्यति। हिरण्येन वा सुवर्णेन वा रत्नेन वा धनेन वा धान्यादिसर्वोपकरणसमृद्धाभिः सर्वसुखोपधानेन सुखितानि भविष्यन्ति। कुशलमूलश्च ध्रियते। तेन सर्वं श्रियो महादेव्याः प्रेमप्रभावप्रेषणं दातव्यं यावज्जीवं तत्रोपस्थास्यति न विलम्बिष्यति। सर्वाभिप्रायांश्चैषां परिपूरयिष्यतीति॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे श्रीमहादेवीपरिवर्तो नाम नवमः॥

## ॥ सर्वबुद्धबोधिसत्त्वनामसंधारणिपरिवर्तः ॥

ॐ नमो भगवते रत्नशिखिनः तथागतस्य। नमः सुवर्णरत्नाकरच्छत्रस्कूटस्य तथागतस्य। नमः सुवर्णपुष्पज्वलरश्मिकेतोस्तथागतस्य। नमो महाप्रदीपस्य तथागतस्य। रुचिरकेतुर्नाम बोधिसत्त्वः। सुवर्णप्रभासोत्तमो नाम बोधिसत्त्वः। सुवर्णगन्धो नाम बोधिसत्त्वः। सदाप्ररुदितो नाम बोधिसत्त्वः। धर्मोद्गतो नाम बोधिसत्त्वः। पुरस्थिमेनाक्षोभ्योनाम तथागतः। दक्षिणेन रत्नकेतुर्नाम तथागतः। पश्चिमेनामितायुर्नाम तथागतः। उत्तरे दुन्दुभिस्वरो नाम तथागतः। सुवर्णप्रभासोत्तमसूत्रेन्द्रराज इमानि बोधिसत्त्वनामानि ये धारयन्ति वाचयन्ति ते बोधिसत्त्वा नित्यं जातिस्मरा भोन्तीति ॥

इति श्रीसुपर्णप्रभासोत्तमसूत्रेन्द्रराजे सर्वबुद्धबोधिसत्त्वनाम संधारणिपरिवर्तो नाम दशमः ॥

## ॥ दृढापृथिवीदेवतापरिवर्तः ॥

अथ खलु दृढा पृथिवीदेवता भगवन्तमेतदवोचत्। अयं भदन्त भगवन्सुवर्णप्रभासोत्तमः सूत्रेन्द्रराज एतर्हि चानागतेऽध्वनि यत्र ग्रामे वा नगरे वा निगमे वा जनपदे वारण्यप्रदेशे वा गिरि-कन्दरे वा राजकुले वोपसंक्रमिष्यति। यत्रायं सुवर्णप्रभासोत्तमः सूत्रेन्द्रराजो विस्तरेण संप्रकाश-यिष्यति। यत्र यत्र भगवन्पृथिवीप्रदेशे तस्य धर्मभाणकस्य भिक्षो ऋजुकायगतस्य धर्मासनप्रज्ञप्तं भविष्यति। यत्र यत्रासने धर्मभाणको निषद्येमं सुवर्णप्रभासोत्तमं सूत्रेन्द्रराजं विस्तरेण संप्रकाश-यिष्यति। तत्राहं भदन्त भगवन्दृढा पृथिवीदेवता तेषु पृथिवीप्रदेशेष्वागमिष्यामि। अत्र धर्मासन-गतोऽस्म्यदृश्यमानेनात्मभावेनोत्तमाङ्गेन च तस्य धर्मभाणकस्य भिक्षोः पादतलौ प्रतिसंहरिष्यामि। आत्मानं चानेन धर्मश्रवणेन धर्मामृतरसेन संतर्पयिष्यामि। संप्रतिमानयिष्यामि संपूजयिष्यामि। आत्मानं च संतर्पयित्वा प्रतिमानयित्वा संप्रहर्षयित्वेममष्टषष्टियोजनसहस्राणि पृथिवीस्कन्धमात्मानं चानेन धर्मश्रवणेन धर्मामृतरसेन यावद्वज्रमयं पृथिवीतलमुपादाय पृथिवीरसेनविवर्धयिष्यामि संप्रति-मानयिष्यामि परिपूरयिष्यामि। उपरितश्चेमं समुद्रपर्यन्तं पृथिवीतलमुपादाय पृथिवीमण्डलं स्निग्धेन पृथिवीरसेन स्नेहयिष्यामि। ओजस्वितरां चेमां महापृथिवीं करिष्यामि। येनास्मिञ्जम्बुद्वीपे नानातृण-गुल्मौषधिवनस्पतय ओजस्वितराः प्रोहयिष्यन्ति। सर्वारामनवृक्षसस्यानि च नानाविधान्योजस्वि-तराणि भविष्यन्ति। गन्धतराणि स्निग्धतराण्यास्वदनीयानि दर्शनीयतराणि महोत्तराणि च भवि-ष्यन्ति। ते च सत्त्वास्तानि पानभोजनानि नानाविधान्युपभुक्त्वा आयुर्बलवर्णेन्द्रियाणि विवर्धयि-ष्यन्ति। तेजोबलवर्णरूपसमन्वाताश्च भूत्वा नानाविधानि पृथिवीगतान्यनेकानि नानाकार्यशतसहस्राणि करिष्यन्त्युत्थास्यन्ति व्यापयिष्यन्ति। बलकरणीयानि कर्माणि करिष्यन्ति॥

तेन हेतुना भदन्त भगवन्सर्वजम्बुद्वीपः क्षेमश्च भविष्यति। सुभिक्षश्च स्फीतश्चर्द्धश्च रमणीयश्च बहुजनाकीर्णमनुष्यश्च भविष्यति। सर्वजम्बुद्वीपे च सत्त्वानि सुखितानि भविष्यन्ति। नानाविचित्रां रतिमनुभविष्यन्ति। तानि सत्त्वानि तेजोबलवर्णरूपसमन्वागतानि च भविष्यन्ति। अस्य सुवर्ण-प्रभासोत्तमस्य सूत्रेन्द्रराजस्यार्थाय तेषां सूत्रेन्द्रधारकाणां भिक्षुभिक्षुण्युपासकोपासिकानं धर्मासनगता-नामन्तिकमुपसंक्रमेयुः। उपसंक्रमित्वा तानि प्रसन्नचित्तानि सर्वसत्त्वानामर्थाय हिताय सुखाय तान्धर्म-भाणकानध्येषयेयुस्य सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य प्रकाशतः। अहं दृढा पृथिवीदेवता सपरि-वारौजस्वितरा च भविष्यामि। तेन भदन्त भगवंश्चास्माकं काये महाबलवी र्यस्थामसंजनितं भवि-ष्यति। तेजश्च श्रीश्च लक्ष्मीश्चास्माकं कायमावेक्ष्यन्ति। मयि च भदन्त भगवन्दृढायां पृथिवी-देवतायामनेन धर्मामृतरसेन संतर्पितायां महातेजोबलवीर्यस्थामवेगप्रतिलब्धायामियं महापृथिवी सप्त-योजनसाहस्रिकायं जम्बुद्वीपो महता पृथिवीरसेन विवर्धयिष्यति। ओजस्वितरा च महापृथिवी

भविष्यति। इमानि च भदन्त भगन सर्वसत्त्वानि पृथिवीसंनिश्रितानि वृद्धिविरूढिवैपुल्यतां च गमिष्यन्ति। महन्ति च भविष्यन्ति। महन्ति च भूत्वा सर्वसत्त्वानि पृथिवीगतानि नानोपभोगपरिभोगान्युपभोक्ष्यन्ति सुखानि चानुभविष्यन्ति । तानि च सर्वाणि नानाविचित्रान्नपानभोज्यवस्त्रशयनासनवसनभवनविमानोद्यानननदीपुष्करिण्युत्सरोह्रदतडागादीनीमान्येवंरूपाणि नानाविधान्युपकरणसुखानि पृथिवीसंस्थितानि पृथिव्यां प्रादुर्भूतानि पृथिव्यां प्रतिष्ठितान्युपभुजन्तु। तेन भदन्त भगवन्हेतुना सर्वसत्त्वैरस्माकं कृतज्ञता कर्तव्या। अवश्यमयं सुवर्णप्रभासोत्तमः सूत्रेन्द्रराजः सत्कृत्य श्रोतव्यः सत्कर्तव्यो गुरुकर्तव्यो मानयितव्यः पूजयितव्यः।

यदा च भदन्त भगवंस्ते सर्वे सत्त्वा नानाकुलेभ्यो नानागृहेभ्यो निष्क्रमेयुस्तेषां धर्मभाणकानामुपसक्रमणाय। उपसंक्रम्य चेमं सुवर्णप्रभासोत्तमं सूत्रेन्द्रराजं शृणुयुः। श्रुत्वा च पुनरेव ते सत्त्वाः स्वकस्वकेषु नानाकुलेषु गृहग्रामनगरनिगमेषु प्रविष्टाः स्वगृहगतां परस्परेणैवं कथयेयुः। गम्भीरोऽस्माभिरद्य धर्मश्रवणः श्रुतः। अचिन्त्योऽस्माभिरद्य पुण्यस्कन्धः परिगृहीतः। तेन धर्मश्रवणेन नरकाः प्रतिमुक्ताः स्युः। तिर्यग्योनियमलोकप्रेतविषयाः परिमुक्ता अद्यास्माभिः। अनेन धर्मश्रवनेनानागतेऽध्वन्यनेकेषु जातिशतसहस्रेषु देवमनुष्योपपत्तिपरिगृहीता भविष्यन्ति। तेन च नानागृहगता भूत्वा तेषां सत्त्वानामितः सुवर्णप्रभासोत्तमात्सूत्रेन्द्रराजादन्तश एकदृष्टान्तमप्यारोचयेयुरन्तश एकपरिवर्तं वा एकपूर्वयोगं वान्तशश्चतुष्पादिकामपि गाथामन्तश एकपदमपि सुवर्णप्रभासोत्तमात्सूत्रेन्द्रराजादन्येषां सत्त्वानां संश्रावयेयुरन्तशः सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य नामधेयमपि परेषां सत्त्वाना संश्रावयेयुः।

यत्र यत्र भदन्त भगवंस्तानि नानाविधानि सत्त्वानि नानाविधेषु पृथिवीप्रदेशष्विमान्येवंरूपाणि नानाविधानि सूत्रान्तहेतूनि परस्परेणारोचयेयुः संश्रावयेयुश्च। कथासंबन्धं च कुर्वीरन्। सर्वे ते भदन्त भगवन्पृथिवीप्रदेशा ओजस्वितराश्च भविष्यन्ति। स्निग्धतराश्च भविष्यन्ति। सर्वेषां सत्त्वानां तेषु तेषु पृथिवीप्रदेशेषु नानाविधानि पृथिवीरसानि सर्वोपकरणानि भूयिष्ठतरमुत्पत्स्यन्ते विवर्धयिष्यन्ते वैपुल्यतां गमिष्यन्ति। सर्वाणि तानि सत्त्वानि महाधनानि महाभोगानि च दानाधिमुक्तानि च भविष्यन्ति। त्रिषु रत्नेष्वभिप्रसन्नानि भविष्यन्ति॥

एवमुक्ते भगवन्दृढां पृथिवीदेवतामेतदवोचत्। ये केचित्पृथिवीदेवते सत्त्वा इतः सुवर्णप्रभासोत्तमात्सूत्रेन्द्रराजादन्तश एकपदमपि शृणुयुस्ते त इतो मनुष्यलोकाच्चवित्वा त्रयस्त्रिंशत्सु देवनिकायेष्वन्यतरान्यतरेषु देवनिकायेषूपपत्स्यन्ते। ये केचित्पृथिवी देवते सत्त्वा अस्य सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजास्यार्थाय तानि स्थानानि समलंकुर्वीरन्नन्तश एकच्छत्रं वा एकदूष्यं वा समलंकृतानि च

देवतास्थानानि। तेषु सप्तसु कामावचरेषु देवनिकायेषु सप्तरत्नमयानि दिव्यानि विमानानि सर्वालंकार-समलंकृतानि संस्थास्यन्ति ते सत्त्वा इतो मनुष्यलोकाच्च्यावित्वा तेषु सप्तरत्नमयेषु दिव्यविमाने-षूपपत्स्यन्ते। ते चैकैकस्मिन्पृथिवीदेवते सप्तरत्नमये दिव्यविमाने सप्तवरा अनुपपत्स्यन्ते अचिन्त्यानि दिव्यानि सुखानि प्रत्यनुभविष्यन्ति॥

एवमुक्ते दृढा पृथिवीदेवता भगवन्तमेतदवोचत्। तेनाहं भदन्त भगवन्दृढा पृथिवीदेवता तस्य धर्मभाणकस्य भिक्षोर्धर्मासनगतस्य तेषु पृथिवीप्रदेशेष्ववासिष्यामि। अदृश्यमानेनात्मभावेन तस्य धर्मभाणकस्य भिक्षोरुत्तमाङ्गेन पादतलौ प्रतिसंहरिष्यामि। यथाप्ययं सुवर्णप्रभसोत्तमः सूत्रेन्द्रराज-स्तेषां बुद्धसहस्रावरुप्तकुशलमूलानां सत्त्वानामर्थाय चिरं जम्बुद्वीपे प्रचरेत्। न च क्षिप्रमन्तर्धापयेत्। सत्त्वानि चेमं सुवर्णप्रभासोत्तमं सूत्रेन्द्रराजं शृणुयुः। अनागतोऽध्वन्यनेकानि कल्पकोटीनियुतशत-सहस्राण्यचिन्त्यानि दिव्यमानुष्यकानि सुखान्यनुभवेयुः। तथागतसमवधानगतानि च भवेयुः। अनागतेऽध्वन्यनुत्तरां सम्यक्संबोधिमभिसंबुध्येयुः। सर्वनरकतिर्यग्योनियमलोकदुःखानि चात्यन्त-समुच्छिन्नानि भवेयुरिति॥

इति श्रीसुवर्णप्रभासोत्तसूत्रेन्द्रराजे दृढापृथिवी देवतापरिवर्तो नामैकादशः॥

# ॥ संज्ञेयमहायक्षसेनापतिपरिवर्तः ॥

अथ खलु संज्ञेयो नाम महायक्षसेनापतिरष्टाविंशतिभिर्महायक्षसेनापतिभिः सार्धमुत्थायासनादेकांसं चीवरं प्रावृत्य दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तमेतदवोचत्। अयं भदन्त भगवन्सुवर्णप्रभासोत्तमः सूत्रेन्द्रराज एतर्हि चानगतेऽध्वनि यत्र ग्रामे वा नगरे वा निगमे वा जनपदे वा जनपदप्रदेशे वारण्यायतने वा गिरिकन्दरे वा राजकुले वा गृहे वा प्रचरिष्यति। तत्राहं भदन्त भगवन्संज्ञेयो नाम महायक्षसेनापतिः सार्धमष्टाविंशति भिर्महायक्षसेनापतिभिस्तत्र ग्रामे  वा नगरे वा निगमे वा जनपदे वारण्ये वा गिरिकन्दरे वा राजकुले वोपसंक्रमिष्यामि। अदृश्यमानेनात्मभावेन तस्य धर्मभाणकस्य भिक्षो रक्षां करिष्यामि। परित्राणं परिग्रहं परिपालनं दण्डपरिहारं शस्त्रपरिहारं शान्तिस्वरत्ययनं करिष्यमि। तेषां च सर्वेषां धर्मश्रवणिकानां स्त्रीपुरुषदारकदारिकाणां येषां केषांचिदितः सुवर्णप्रभासोत्तमात्सूत्रेन्द्रराजादन्तश एका चतुष्पादिकापि गाथा श्रुता भवेदन्तश एकपदमपि सुवर्णप्रभासोत्तमात्सूत्रेन्द्रराजादेकबोधिसत्त्वनामधेयमपि श्रुतं भवेदुद्गृहीतं वैकतथागतनामधेयं वान्तशश्चास्य सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्य नामधेयं श्रुतं भवेदुद्गृहीतं वा तेषां सर्वेषामारक्षां करिष्यामि। परित्राणं परिग्रहं परिपालनं दण्डपरिहारं शस्त्रपरिहारं शान्तिस्वस्त्ययनं च करिष्यामि। तेषां च कुलानां तेषां च गृहाणां तेषां च नगराणां तेषां च ग्रामाणां तेषां च निगमानां तेषां चारण्यानां तेषां च राजकुलानामारक्षां करिष्यामि। परित्राणं परिग्रहं परिपालनं दण्डपरिहारं शस्त्रपरिहारं शान्तिस्वस्त्ययनं करिष्यामि॥

तत्कतमेन हेतुना। सर्वधर्माः परिज्ञाताः सर्वधर्मा अवबुद्धाः। यावन्तश्च सर्वधर्माः। यथा च सर्वधर्माः। संस्थिता ये च सर्वधर्माः। सम्यग्ज्ञाताश्च सर्वधर्माः। सर्वधर्मेष्वहं भदन्त भगवन्प्रत्यक्षः। अचिन्त्या मे भदन्त भगवञ्ज्ञानावभासाः। अचिन्त्यो ज्ञानालोकः। अचिन्त्यो ज्ञानप्रचारः। अचिन्त्यो ज्ञानस्कन्धः। अचिन्त्यो मे भदन्त भगवन्सर्वधर्मेषु ज्ञानविषयः प्रवर्तते। यथा च मे भदन्त भगवन्सर्वधर्माः समम्यग्ज्ञाताः। सम्यक्परीक्षिताः सम्यक्परिज्ञाताः सम्यग्व्यवलोकिताः सम्यगवबुद्धाः। तेन हेतुना मम भदन्त भगवन्संज्ञेयस्य महायक्षसेनापतेः संज्ञेय इति नामधेयं समुदपादि॥

अहं भदन्त भगवन्धर्मभाणकस्य भिक्षोर्वाक्यविभूषणार्थाय प्रतिभानमुपसंहरिष्यामि। रोमान्तरेषु च तस्यौजः प्रक्षेप्स्यामि। महान्तं च तस्य स्थाम च बलं वीर्यं च काये संजनयिष्यामि। अचिन्त्यं तस्य ज्ञानावभासं करिष्यामि। स्मृतिं च तस्य बोधयिष्यामि। महन्तं च तस्योत्सहं दास्यामि। यथा च स धर्मभाणको न क्लान्तकायो भवेत्। सुखेन्द्रियकायो भवेत्। प्रहर्षजातश्च भवेत्। येनायं सुवर्णप्रभासोत्तमः सूत्रेन्द्रराजस्तेषां बुद्धसहस्रावरुप्तकुशलमूलानां सत्त्वानामर्थाय चिरं जम्बुद्वीपे प्रचरेत्। न

क्षिप्रमन्तर्धापयेत्। सत्त्वाश्चेमं सुवर्णप्रभासोत्तमं सूत्रेन्द्रराजं शृणुयुः। अचिन्त्यं च ज्ञानस्कन्धं प्रतिलभेयुः। प्रज्ञावन्तश्च भवेयुः। अपरिमितं च पुण्यस्कन्धं परिगृह्णीयुः। अनागतेऽध्वन्यनेककल्पकोटीनियुतशतसहस्राण्यचिन्त्यानि दिव्यमानुष्यकानि सुखान्यनुभवेयुः। तथागतसमवधानगताश्च भवेयुरनागतेऽध्वन्यनुत्तरां सम्यक्संबोधिमभिसंबुध्येरन्। सर्वनरकतिर्यग्योनियमलोकदुःखानि चात्यन्तेन समुच्छिन्नानि भवेयुरिति ॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे संज्ञेयमहायक्षसेनापति परिवर्तो नाम द्वादशः ॥

# ॥ देवेन्द्रसमयराजशास्त्रपरिवर्तः ॥

नमस्तस्य भगवतो रत्नकुसुमगुणसागरवैडूर्यकनकगिरिसुवर्णकाञ्चनप्रभासश्रियस्तथागतस्यार्हतः सम्यक्संबुद्धस्य। नमस्यस्यानेकगुणकोटीनियुतशतसहस्रसमलंकृतशरीरस्य शाक्यमुनेस्तथागतस्य यस्येयं धर्मोल्का ज्वलति। नमस्तस्या अपरिमितपुण्यधान्यमाङ्गल्यसम्पन्नायाः श्रियो महादेव्याः। नमस्तस्या अपरिमितगुणप्रज्ञासमुदितायाः सरस्वत्या देव्याः॥

तेन खलु पुनः कालेन तेन समयेन राजा बलदकेतुः पुत्रस्य रुचिरकेतोरचिराभिषिक्तस्य च राज्यप्रतिष्ठितस्यैतदवोचत्। अस्ति पुत्र देवेन्द्रसमयं नाम राजशास्त्रम्। यन्मया पूर्वमचिराभिषिक्तेन च राज्यप्रतिष्ठितेन पितू राज्ञो बलेन्द्रकेतोः सकाशादुद्गृहीतम्। तेन मया देवेन्द्रसमयेन राजशास्त्रेण विंशतिवर्षसहस्राणि राजत्वं कारितं बभूव। नाभिजानाम्यहमन्तश एकचित्तक्षणप्रमाणमात्रेणापि कस्यचिदधर्मेस्थितपूर्वम्। कतमत्तत्र देवेन्द्रसमयं नाम राजशास्त्रम्॥

अथ खलु कुलदेवते राजा बलदकेतुस्तेन कालेन तेन समयेन पुत्रस्य राज्ञो रुचिरकेतोरिमा-भिर्गाथाभिर्देवेन्द्रसमयं नाम राजशास्त्रं विस्तरेण संप्रकाशयति स्म॥

राजशास्त्रं प्रवक्ष्यामि सर्वसत्त्वहितं करम्।
सर्वसंशयच्छेत्तारं सर्वदुष्कृतनाशनम्॥ १॥

हृष्टचित्ता भवित्वेह सर्वे नृपतयः पृथक्।
सर्वदेवेन्द्रसमयं शृणुध्वं प्राञ्जलिकृताः॥ २॥

वज्रप्राकारगिरीन्द्रेऽस्मिन्देवेन्द्राणां समागमैं।
उत्थितैर्लोकपालेभिर्ब्रह्मेन्द्रः परिपृच्छितः॥ ३॥

त्वं नः सुरगुरुर्ब्रह्मा देवतानां त्वमीश्वरः।
छेत्ता त्वं संशयानां च च्छिन्दयास्माकं संशयम्॥ ४॥

कथं मनुष्यसंभूतो राजा देवः स प्रोच्यते।
यदिह मानुषे लोके जायते च भवन्नृपः॥ ५॥

कथं देवमनुष्येषु राजत्वं च करिष्यते ।
एवं हि लोकपालिभिर्ब्रह्मेन्द्रः परिपृच्छतः ॥ ६ ॥

सर्वा सुरगुरुर्ब्रह्मा लोकपालानिहाब्रवीत् ।
यदिह लोकपालेभिरेतर्हि मम पृच्छितः ।
सर्वसत्त्वहितार्थाय वक्ष्येऽहं शास्त्रमुत्तमम् ॥ ७ ॥

नाराणां संभवं वक्ष्ये युक्तवाहं मनुजालये ।
हेतुना येन राजानो भवन्ति विषयेषु च ॥ ८ ॥

देवेन्द्राणामधिष्ठाने मातुः कुक्षौ प्रवेक्ष्यति ।
पूर्वमधिष्ठितो देवैः पश्चाद् गर्भे प्रपद्यते ॥ ९ ॥

किं चापि मानुषे लोके जायते श्रीयते नृपः ।
अपि वै देवसंभूतो देवपुत्रः स उच्यते ॥ १० ॥

त्रायस्त्रिंशैर्देवराजेन्द्रैर्भागो दत्तो नृपस्य हि ।
पुत्रस्त्वं सह देवानां निर्मितो मनुजेश्वरः ॥ ११ ॥

अधर्मशमनार्थाय दुष्कृतानां निवारकः ।
सुकृतौ स्थापयेत्सत्त्वान्प्रेषणार्थं सुरालये ॥ १२ ॥

मनुष्यो वाथ देवो वा गन्धर्वो वा नराधिपः ।
राक्षसो वाथ चण्डालो दुष्कृतानां निवारकः ॥ १३ ॥

माता पिता वा नृपतिः सुकृतौ कर्मकारिणाम् ।
विपाकफलदर्शी त्वं देवराजैरधिष्ठितः ॥ १४ ॥

सुकृतदुष्कृतानां च कर्मणां दृष्टधार्मिकः ।
विपाकफलदर्शी त्वं देवराजैरधिष्ठितं ॥ १५ ॥

यदा ह्युपेक्षते राजा दुष्कृतं विषये स्थितम्।
नानारूपं न कुर्वीत दण्डं पापजनस्य च।
दुष्कृतानामुपेक्षायामधर्मो वर्धते भृशम्॥ १६॥

शाठ्यानि कलहाश्चैव भूयो राष्ट्रे भवन्ति च।
प्रकुप्यन्ति च देवेन्द्रास्त्रायत्रिंशद्भवनेषु च॥ १७॥

यदा ह्युपेक्षते राजा दुष्कृतं विषये स्थिरम्।
हन्यते विषयो घोरैः शठ्यैरपि सुदारुणैः॥ १८॥

विनश्यति च तद्राष्ट्रं परचक्रस्य चाक्रमे।
भोगानि च बलान्येव धनं यस्यास्ति संचितम्॥ १९॥

विविधानि च शाठ्यानि हरन्ति च परस्परम्।
येन कार्येण राजत्वं नैतत्कार्यं करिष्यति।
विलोपयति स्वं राष्ट्रं गजेन्द्र इव पद्मिनीम्॥ २०॥

विषमा वायवो वान्ति विषमा जलवृष्टयः।
विषमा ग्रहनक्षत्राश्चन्द्रसूर्यौ तथैव च॥ २१॥

सस्यं पुष्पं फलं बीजं व सम्यक्परिपच्यते।
दुर्भिक्षं भवते तत्र यत्र राजा ह्युपेक्षकः।
अनात्तमानसो देवा भवन्ति भवनेषु च॥ २२॥

यदा ह्युपेक्षते राजा दुष्कृतं विचरेत्परम्।
ते सर्वे देवराजाश्च वक्ष्यन्ति च परस्परम्॥ २३॥

अधार्मिको ह्ययं राजा ह्यधर्मपक्षमाश्रितः।
न चिरेण ह्ययं राजा देवतां कोपयिष्यति॥ २४॥

देवतानां परिकोपाद्विषयोऽस्य विनक्ष्यति।
शस्त्राणि च अधर्मश्च विषयेऽत्र भविष्यन्ति॥ २५॥

शाठ्यानां कलहानां च रोगाणां च समुद्भवः।
प्रकुप्यति च देवेन्द्र उपेक्ष्यन्ति च देवताः॥ २६॥

प्रलुप्यते च यद्राष्ट्रं स नृपः शोकमृच्छति।
इष्टवियोगं प्राप्नोति भ्रात्रा वाथ सुतेन वा॥ २७॥

प्रियभार्यावियोगो वा प्राप्यते दुहिताथ वा।
उल्कापाता भविष्यन्ति प्रतिसूर्यास्तथैव च॥ २८॥

परचक्रभयं वापि दुर्भिक्षं वर्धते भृशम्।
प्रियामात्यश्च म्रियतेऽप्रियस्तु गर्जते वचः॥ २९॥

सुताभीष्टं प्रियाश्वासं बालाभार्याविरोधिनः।
परस्परं हरिष्यन्ति कुलभोगं धनानि च॥ ३०॥

देशे देशे हनिष्यन्ति शस्त्रेण च परस्परम्।
विवादाः कलहाः शाठ्या भवन्ति विषयेषु च॥ ३१॥

ग्रहः प्रविशते राष्ट्रे व्याधिर्भवति दारुणः।
अधार्मिका भविष्यन्ति दिक्षणीयास्तदन्तरम्॥ ३२॥

अमात्याः परिषद्याश्च भवन्त्यस्याप्यधार्मिकाः।
अधार्मिकजने पूजा भविष्यन्ति तदन्तरम्॥ ३३॥

धार्मिकानां च सत्त्वानां निग्रहो भवति ध्रुवम्।
अधार्मिकजने मानं धार्मिकानां च  निग्रहम्।
त्रयस्तत्र  प्रकुप्यन्ते नक्षत्रजलवायवः॥ ३४॥

त्रयो भावा विनश्यन्ति अधार्मिकजनो ग्रहे।
सद्धर्मरसनोजश्च सत्त्वोजः पृथिवीरसः॥ ३५॥

असत्यजनसंमानं सत्यजनविमानता।
त्रयस्तत्र भविष्यन्ति दुर्भिक्षमथ निर्भरम्।
फलसस्यरसौजश्च न भवति तदन्तरे॥ ३६॥

ग्लानेन बहुलाः सत्त्वा भवन्ति विषयेषु च।
मधुराणि महान्ति च फलानि विषयेऽपि हि।
परीता च भविष्यन्ति तिक्तः कटुक एव च॥ ३७॥

पूर्वा रम्याणि भावानि क्रीडाहास्यरतीनि च।
सभा रम्या भविष्यन्ति आयासशतव्याकुलाः॥ ३८॥

धान्यानां च फलानां च स्निग्घभावो रसः क्षयेत्।
न तथा प्रीणयिष्यन्ति शरीरेन्द्रियधातवः॥ ३९॥

दुर्वर्णाः सत्त्वा भविष्यन्ति स्वल्पस्थामाः सुदुर्बलाः।
बहु च भोजनं भुक्त्वा तृप्तिं नासादयन्ति ते॥ ४०॥

बलं च स्थाम वीर्यं च न लभन्ति तदन्तरे।
हीनवीर्याणि सत्त्वानि भवन्ति विषयेषु च॥ ४१॥

सत्त्वा भविष्यन्ति रोगार्ता नानाव्याधिप्रपीडिताः।
ग्रहा भविष्यन्ति नक्षत्रा नानाराक्षससंभवाः॥ ४२॥

अधार्मिको भवेद्राजा अधर्मपक्षसंस्थितः।
त्रैधातुके विरुद्धोऽस्ति सर्वत्रैलोक्यमण्डलम्।
अनेके ईदृशा दोषा भवन्ति विषयेषु च॥ ४३॥

यदा पक्षस्थितो राजा दुष्कृतं समुपेक्षते ।
येन कार्येण राजा वै देवेन्द्रेभिरधिष्ठितः ।
न तत्करोति राजत्वं दुष्कृतं समुपेक्षतः ॥ ४४ ॥

सुकृतेनोपपद्यन्ते सर्वदेवसुरालये ।
दुष्कृतेन च गच्छन्ति प्रेततिर्यन्नरकेषु च ।
त्रायस्त्रिंशद्देवस्थाने प्रतापयन्ति दुष्कृतात् ॥ ४५ ॥

यदा ह्युपक्षते राजा दुष्कृतं विषये स्थितम् ।
पितृणां देवराजानां भवेन सापराधिकः ।
न तद्भवति पुत्रत्वं न रजत्वं कृतं भवेत् ॥ ४६ ॥

यदापि नश्यते कार्यं शाठ्यैरपि सुदारुणैः ।
तस्मादधिष्ठितो राजा देवेन्द्रर्मनुजालये ॥ ४७ ॥

दुष्कृतानां  शमनार्थाय सुकृतानां प्रवर्तकः ।
दृष्टधार्मिकः सत्त्वानां विपाकजनको नृपः ॥ ४८ ॥

सुकृतदुष्कृतानां च कर्मणां यः पृथग्विधः ।
विपाकफलदर्शार्थं कर्त्ता राजा हि प्रोच्यते ।
अधिष्ठितो देवगणैर्देवेन्द्रैरनुमोदितः ॥ ४९ ॥

आत्मनोऽर्थं परार्थाय धर्मार्थं विषयस्य च ।
दमनार्थाय राष्ट्रेषु शठपापजनस्य च ॥ ५० ॥

त्यजेच्च जीवितं राज्यं धर्मार्थं विषयस्य च ।
मा चाधर्ममपृच्छित्वा जानन्तं समुपेक्षत ॥ ५१ ॥

न चान्यस्तादृशो नाशो विषयेऽस्मिन् सुदारुणः ।
यदा शाठ्यसमुत्पन्नः शाठ्यकान्तारनिग्रहः ॥ ५२ ॥

भूयो भवन्ति शाठ्यानि विषयेऽस्मिन् सुदारुणा ।
विलुप्यते च तद्राष्ट्रं गजैरिव महासरः ॥ ५३ ॥

प्रकुप्यन्ति च देवेन्द्रा विलुम्पते सुरालयम् ।
विषमाः सर्वभावाश्च भवन्ति विषयस्य हि ॥ ५४ ॥

तस्माद्दोषानुरूपं स्याद्दमनं पापकारिणाम् ।
धर्मेण पालयेद्राष्टं मा चाधर्मं समाचरेत् ॥ ५५ ॥

जीवितं च परित्यज्य मा पापे पतितो भवेत् ।
बन्धुजने परजने सर्वराष्ट्रजनेषु च ।
एकापेक्षो भवेद्राजा मा पक्षे पतितो भवेत् ॥ ५६ ॥

त्रैलोक्यमापूरयते यशसा धार्मिको नृपः ।
हर्षयिष्यन्ति देवेन्द्रास्त्रायस्त्रिंशद्भवेषु च ॥ ५७ ॥

जम्बूद्वीपे तथास्माकं पुत्रो धर्मात्मको नृपः ।
धर्मेण शास्यते राष्ट्रं सुकृते स्थाप्यते जनम् ॥ ५८ ॥

सुकृतेन च राजा तं इह प्रेषयते जनम् ।
देवैर्देवसुतैः पूर्णं करोति च सुरालयम् ॥ ५९ ॥

धर्मेण शास्यते राष्ट्रं राजा नः सुप्रहर्षिताः ।
प्रसन्ना भोन्ति देवेन्द्रा रक्षन्ते तान्नराधिपान् ॥ ६० ॥

सम्यग्वहन्ति नक्षत्रा चन्द्रसूर्यौ तथैव च ।
कालेन वायवो वान्ति काले चैवं प्रवर्षति ॥ ६१ ॥

सुभिक्षं कुर्वते राष्ट्रे तथा देवसुरालये ।
अमरामरपुत्रेण पूर्णं भोति सुरालयम् ॥ ६२ ॥

तस्मात्त्यज्येन्नरपतिः प्रियं जीवितमात्मनः।
आवर्तयेद्धर्मरत्नं येन लोकः सुखी भवेत्। ६३॥

धार्मिकीं च नयेत् सेवां यो गुणैः समलंकृतः।
स नित्यं सेवते तुष्टं सदा पापविवर्जितः॥ ६४॥

धर्मेण पालयेद्राष्ट्रं धर्मे समनुशासयेत्।
सुकृते स्थापयेत् सत्त्वान्दुष्कृते च विवारयेत्॥ ६५॥

सुभिक्षं भवते राष्ट्रे तेजस्वी भवते नृपः।
यथानुरूपं कुरुते दमनं पापकारिणाम्।
यशस्वी भवते राजा सुखं पालयते प्रजामिति॥ ६६॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे देवेन्द्रसमयं नाम राजशास्त्रपरिवर्तस्त्रयोदशमः॥

## ॥ सुसंभवपरिवर्तः ॥

ससागरा त्यक्त वसुंधरा तदा यदा बभूव नृप चक्रवर्ती।
चत्वारि द्वीपानि सरत्नपूर्णनिर्याति ता पूर्वजिनेषु मह्यम्॥ १॥

न चास्ति तद्वस्तु प्रियं मनापं
पूर्वं च  मह्यं न व त्यक्तमासीत्।
तं धर्मकायं परिमार्गणार्थः
प्रियजीवितं त्यक्तमनेककल्पान्॥ २॥

यथ पूर्वकल्पेषु अचिन्तियेषु
रत्नशिखिस्य सुगतस्य शासने।
परिनिर्वृतस्य सुगतस्य तस्य
सुसंभवो नाम बभूव राजा॥ ३॥

स चक्रवर्ती चतुर्द्वीप ईश्वरः
समुद्रपर्यन्तमही प्रशास्यते।
जिनेन्द्रघोषाय च राजधानीय
सुप्तो बभूवा तद राजकुञ्जरः॥ ४॥

स्वप्नान्तरे बुद्धगुणाञ्च श्रुत्वा
रत्नोच्चयं पश्यति धर्मभाणकम्।
स्थित सूर्यमध्ये व विरोचमानं
प्रकाशयन्तं इम सूत्रराजम्॥ ५॥

स्वप्नाद्विबुद्धश्च बभूव राजा
पीतिस्फुटं सर्वशरीरमस्य।
अभिनिष्क्रर्म राजकुलानि दृष्टु
उपसंक्रमी श्रावकसंघमग्रम्॥ ६ ॥

करोति पूजां जिनश्रावकाणां
रत्नोच्चयं पृच्छति धर्मभाणकम् ।
क्व चास्ति भिक्षूरिह चार्यसंघे
रत्नोच्चयो नाम गुणान्वितश्च ॥ ७ ॥

तेनान्तरेणा रतनोच्चयो हि
अन्यत्र गूहान्तर संनिषणः ।
विचित्ररत्नं इम सूत्रराजं
स्वध्यायमानः सुख संनिषणः ॥ ८ ॥

देशेन्ति राजस्य तदन्तरेण
रत्नोच्चयं भिक्षु स धर्मभाणकम् ।
अन्यत्र गूहान्तरसंनिषणं ।
तं तेन रश्मीश्रियया ज्वलन्तम् ॥ ९ ॥

एषोऽत्र रत्नोच्चय धर्मभाणको
धारेति गम्भीरजिनस्य गोचरम् ।
स्वर्णप्रभासोत्तमसूत्ररत्नं
सूत्रेन्द्रराजं सततं प्रकाशयेत् ॥ १० ॥

वन्दित्व पादौ रतनोच्चयस्य
सुसंभवो राज इदं प्रवीद्धि ।
देशे हि मे पूर्णशशाङ्क चक्रं
स्वर्णप्रभासोत्तमसूत्ररत्नम् ॥ ११ ॥

अधिवासयी सो रतनोच्चयश्च
राज्ञश्च तस्यैव सुसंभवस्य ।
सर्वत्रिसाहस्त्रिकलोकधातौ
प्रहर्षितास्सर्वि बभूवु देवताः ॥ १२ ॥

वसुधाप्रदेशे परमे विशिष्टे
रत्नोदके गन्धजलाम्बुसिक्ते ।
पुष्पावकीर्णां धरणीं स कृत्वा
तत्रासनं प्राप्य तदा नरेन्द्रः ॥ १३ ॥

समलंकृतं राज्ञ तदासनं च
च्छत्रैर्ध्वजैर्घण्टसहस्रनेकैः ।
नानाविचित्रैर्वरपुष्पचन्द्रैर्
अभ्योकिरे राज्ञ तदासनं च ॥ १४ ॥

देवाश्च नागासुरकिंनराश्च
यक्षाश्च यक्षेन्द्रमहोरगाश्च ।
दिव्यैश्च मान्दारवपुष्पवर्षैर्
अभ्यावकीर्णाश्च तदासनं च ॥ १५ ॥

अचिन्तियानन्त सहस्रकोटियो
ये आगता देवभवाग्रकामाः ।
अभिनिष्क्रमित्वा रतनोच्चयं हि
अभ्यो किरन्ति स्म च सालपुष्पा ॥ १६ ॥

सो चापि रत्नोच्चय धर्मभाणकः
शुभाभगात्रः शुचिवस्त्रप्रावृतः ।
उपसंक्रमित्वा च तदासनं हि
कृताञ्जलीभूत्व नमस्यते च ॥ १७ ॥

देवेन्द्रदेवानि च देवतानि
मान्दारपुष्पं च प्रवर्षयन्ति ।
अचिन्तिया तूर्यशता सहस्रा
प्रवादयन्ति स्थित अन्तरीक्षे ॥ १८ ॥

अभीरुहित्वा च स संनिषण्णो
रत्नोच्चयो भिक्षु स धर्मभाणकः।
अनुस्मरित्वा दशसू दिशासु
अचिन्तिया बुद्धसहस्रकोट्यः॥ १९॥

सर्वेष सत्त्वान कृपांज नित्य
कारुण्यचित्तं समुपादयेत् सः।
राज्ञश्च तस्यापि सुसंभवस्य
प्रकाशितं सूत्रमिदं तदन्तरे॥ २०॥

कृताञ्जलीभूत्व स्थिहित्व राजा
यः कायवाचा मनुमोदितः सः।
सद्धर्मवेगाश्रुप्रमुक्तनेत्रः
प्रतिस्फटस्तस्य बभूव कायः॥ २१॥

इमस्य सूत्रस्य च पूजनार्थं
सुसंभवो राज तदन्तरेण
गृह्णित्व चिन्तामणिराजरत्नं
सर्वार्थहेतोः प्रणिधिं चकार॥ २२॥

वर्षन्तु अद्या इह जम्बुद्विपे
ससप्तरत्नाणि च भूषणानि
ये चेह सत्त्वाः खलु जम्बुद्विपे
सुखिताश्च भेष्यन्ति महाधनाश्च॥ २३॥

चतुर्षु द्वीपेषु प्रवर्षितानि
सप्तानि रत्नानि तदन्तरेण।
केयूरहारा वरकुण्डलानि
तथान्नपाने वसनानि चैव॥ २४॥

दृष्ट्वा च तं राज सुसंभवश्च
रत्नप्रवर्षं खलु जम्बुद्वीपे।
चत्वारि द्वीपानि सरत्नपूर्णा
निर्यातयी रत्नशिखिस्य शासने॥ २५॥

अहं च सः शाक्यमुनिस्तथागतः
सुसंभवो नाम  बभूव राजा।
येनेह मे त्यक्त वसुंधरा तदा
चत्वारि द्वीपानि सरत्नपूर्णा॥ २६॥

अक्षोभ्य आसीत् स तथागतश्च
रत्नोच्चयो भिक्षु स धर्मभाणकः।
येनास्य राजस्य सुसंभवस्य
प्रकाशितं सूत्रमिदं तदान्तरे॥ २७॥

यन्मे श्रुतं सूत्रमिदं तदन्तरे
एकाग्रवाचामनुमोदितं च।
तेनैव मह्यं कुशलेन कर्मणा
श्रोतानुमोदेन श्रुतेन तेन॥ २८॥

सुवर्णवर्णं शतपुण्यलक्षणं
लभेयि कायं प्रियदर्शनं सदा।
नयनाभिरामं जनकान्तदर्शनं
रतिंकरं देवसहस्रकोटिनाम्॥ २९॥

नवोत्तरं नोतिसहस्रकोट्या
कल्पानभूवं नृपचक्रवर्ती।
अनेक कल्पान सहस्रकोट्यो
त्रैलोक्यराजत्व मयानुभूतम्॥ ३०॥

अचिन्तिया कल्प बभूव शक्रः
तथैव ब्रह्मेन्द्र प्रशान्तमानसः ।
आरागिता मे बलाप्रमेया
येषां प्रमाणं न कदाचि विद्यते ॥ ३१ ॥

तथा प्रमाणं बहु पुण्यस्कन्धं
यन्मे श्रुतं सूत्रनुमोदितं च ।
यथाभिप्रायेण मि बोधि प्राप्ता
सद्धर्मकायश्च मया हि लब्ध ॥ ३२ ॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे सुसंभवपरिवर्तो नाम चतुर्दशमः ॥

# ॥ यक्षाश्रयरक्षापरिवर्तः ॥

यः कश्चिच्छ्रीमहादेवि श्राद्धः कुलपुत्रो वा कुलदुहिता वातीतानागतप्रत्युत्पन्नानां बुद्धानां भगवतामचिन्त्यां महतीं विपुलां विस्तीर्णां सर्वोपकरणैः पूजां कर्त्तुकामः स्यात्। अतीतानागतप्रत्युत्पन्नानां बुद्धानां भगवतां गम्भीरं बुद्धगोचरं परिज्ञातुकामो भवेत्। तेनावश्यं तत्र प्रदेशे विहारे वारण्यप्रदेशे वा यत्रायं सुवर्णप्रभासोत्तमः सूत्रेन्द्रराजः विस्तरेण संप्रकाश्यते। तेनाविक्षिप्तचित्तेनाविरहितश्रोत्रेणायं सुवर्णप्रभासोत्तमः सूत्रेन्द्रराजः श्रोतव्यः॥

अथ खलु भगवानिममेवार्थं भूयस्या मात्रया संपरिदीपयमानस्तस्यां वेलायामिमा गाथा अभाषत॥

य इच्छेत्सर्वबुद्धानां पूजां कर्तुमचिन्तियाम्।
गम्भीरं सर्वबुद्धानां गोचरं च प्रजनितुम्॥ १॥

सर्वदेशोपसंक्रम्य विहारं लयनं तथा।
यावद्देशीयते सूत्रं स्वर्णभासोत्तमं त्विदम्॥ २॥

अचिन्तियमिदं सूत्रमनन्तगुणसागरम्।
मोचकं सर्वसत्त्वानामनेकदुःखसागरात्॥ ३॥

आदिं सूत्रस्य पश्यामि मध्यमनिधनं तथा।
अतिगम्भीरसूत्रेन्द्र उपमानं न विद्यते॥ ४॥

न गङ्गारजसा चैव न धरण्यां न सागरे।
न चाम्बरतलस्थस्य किंचिच्छक्योपमा कृतुम्॥ ५॥

धर्मधातुप्रवेशेन प्रवेष्टव्यं तदन्तरम्।
यत्र धर्मात्मकस्तूपं गम्भीरं सुप्रतिष्ठितम्॥ ६॥

तत्र च स्तूपमध्येऽस्मिन्पश्येच्छाक्यमुनिं जिनम्।
इदं सूत्रं प्रकाशन्तं मनोज्ञेन स्वरेण च॥ ७॥

यावन्ति कल्पकोट्यो वै असंख्येया अचिन्तियाः।
दिव्यमानुष्यकाण्येव सुखानि ह्यनुभूयते ॥ ८ ॥

यदा स एवं जानीयाद्यत्तत्र सूत्र श्रूयते।
एवमचिन्तियं मह्यं पुण्यस्कन्धं समार्जितम् ॥ ९ ॥

आक्रमेद्योजनशतं पूर्णमग्निखदावृतम्।
यः सकृच्छुणितुं सूत्रं सहेतु वेदनां भृशम् ॥ १० ॥

समनन्तरप्रविष्टस्य विहारं लयनं तथा।
अपगच्छति पापानि सर्वदुःस्वप्नलक्षणा ॥ ११ ॥

ग्रहनक्षत्रपीडा च काखोर्दग्रहदारुणा।
समनन्तरप्रविष्टस्य सर्वे भोन्ति पराङ्मुखाः ॥ १२ ॥

तादृशमासनं तत्र कुर्वीत पद्मसंनिभम्।
यादृशं नागराजैश्च दर्शितं सुपिनान्तरे ॥ १३ ॥

तत्रासनोपविष्टस्य इदं सूत्रं प्रकाशयेत्।
लिखितं वाचयेच्चैव तथैव पर्यवाप्नुयात् ॥ १४ ॥

अवतीर्यासनादेव अन्यदेशे गतो भवेत्।
दृश्यन्ते प्रतिहार्याणि तत्रासनगतानि च ॥ १५ ॥

धर्मभाणकरूपं च कदाचित्तत्र दृश्यते।
कदाचिद्बुद्ध रूपं च बोधिसत्त्वं कदाचन ॥ १६ ॥

समन्तभद्ररूपाणि क्वचिन्मञ्जुश्रियस्तथा।
क्वचिन्मैत्रेयरुपाणि दृश्यन्ते तत्र आसने ॥ १७ ॥

क्वचित्केवलमाभासं क्वचिद्देवोपदर्शनम्।
मुहूर्तेनाभिदृश्यन्ते पुनश्चान्तरहायिषु ॥ १८ ॥

सर्वत्र संसिद्धिकरं प्रशस्तं बुद्धशासनम्।
धन्यमङ्गलसम्पन्नं संग्रामे च जयावहम्॥ १९॥

जम्बुद्वीपमिदं सर्वं यशसा पूरयिष्यति।
सर्वे च रिपवस्तस्य निर्जिता भोन्ति सर्वथा ॥ २० ॥

निहतशत्रुः सदा भोति सर्वपापविवर्जितः।
सदा विजितसंग्रामः श्रिया स च प्रमोदति ॥ २१ ॥

ब्रह्मेन्द्रास्त्रिदशेन्द्राश्च लोकपालास्तथैव च।
वज्रपाणिश्च यक्षेन्द्रः संज्ञेयश्च नरर्षभः॥ २२ ॥

अनवतप्त नागेन्द्रः सागरश्च तथैव च।
किंनरेन्द्राः सुरेन्द्राश्च गरुडेन्द्रास्तथैव च।
एतांश्च प्रमुखान् कृत्वा सर्वाणि देवतानि च॥ २३॥

ते च ता नित्यं पूजन्ति धर्मस्तूपमचिन्तियम्।
प्रहर्षिता भविष्यन्ति दृष्ट्वा सत्त्वाः स गौरवाः॥ २४ ॥

तेऽप्येवं चिन्तयिष्यन्ति देवेन्द्राः सर्व उत्तमाः।
देवताश्चैव तास्सर्वा वक्ष्यन्ति च परस्परम्॥ २५॥

एता पश्यथ सर्वाणि तेजः श्रीपुण्यसंचिता।
उप्तकुशलमूलेन आगतास्ते नरा इह ॥ २६ ॥

य इमं सूत्रगम्भीरं श्रवणार्थमिहागताः।
अचिन्तियप्रसादेन धर्मस्तूपे सगौरवाः॥ २७॥

एते कारुणिका लोके एते सत्त्वहितंकराः।
एते गम्भीरधर्माणां सद्धर्मरसभोजनम्॥ २८॥

धर्मधातुप्रवेशेन य एते प्रविशन्ति च।
ये शृण्वन्ति इदं सूत्रं ये चान्याञ्श्रावयन्ति च॥ २९॥

बुद्धा शतसहस्राणि तेभिस्ते पूर्वपूजिताः।
एतेन कुशलमूलेन इदं सूत्रं शृण्वन्ति च॥ ३०॥

ते सर्वे देवराजेन्द्राः सरस्वती तथैव च।
श्रीश्च वैश्रवणश्चैव तथा चतुर्महाधिपाः॥ ३१॥

यक्षशतसहस्रेभिर्ऋद्धिमद्भिर्महाबलैः।
तेषां रक्षां करिष्यन्ति दिवारात्रावतन्द्रिताः॥ ३२॥

महाबलैश्च यक्षेन्द्रैर्नारायणमहेश्वरौ।
अष्टाविंशतिश्चाप्यन्ये संज्ञेयप्रमुखाणि च॥ ३३॥

यक्षशतसहस्रेभिर्ऋद्धिमद्भिर्महाबलैः।
तेषां रक्षां करिष्यन्ति सर्वत्रासभयेषु च॥ ३४॥

वज्रपाणिश्च यक्षेन्द्रः पञ्चयक्षशतैरपि।
सर्वेभि बोधिसत्त्वेभिस्तेषां रक्षां करिष्यति॥ ३५॥

मणिभद्रश्च यक्षेन्द्रः पूर्णभद्रस्तथैव च।
कुम्भीरोऽटावकश्चैव पिङ्गलश्च महाबलः। ३६॥

एकैकश्चैव यक्षेन्द्रः पञ्चयक्षशतैर्वृतः।
तेषां रक्षां करिष्यति येभिः सूत्रमिदं श्रुतम्॥ ३७॥

चित्रसेनश्च गन्धर्वो जिनराजो जिनर्षभः ।
मणिकण्ठो नीलकण्ठश्च वर्षाधिपतिरेव च ॥ ३८ ॥

महाग्रासो महाकालः स्वर्णकेशी तथैव च ।
पाञ्चिकश्छगलपादश्च महाभागस्तथैव च ॥ ३९ ॥

प्रणाली महापालश्च मर्कटो वालिरेव च ।
सूचिरोमः सूर्यमित्रो रत्नकेशस्तथैव च ॥ ४० ॥

महाप्रणाली नकुलः कामश्रेष्ठश्च चन्दनः ।
नागायनो हैमवतः सातागिरिस्तथैव च ॥ ४१ ॥

सर्वे त ऋद्धिमन्तश्च महाबलपराक्रमाः ।
तेषां रक्षां करिष्यन्ति येषां सूत्रमिदं प्रियम् ॥ ४२ ॥

अनवतप्तो हि नागेन्द्रः सागरोऽपि तथैव च ।
मुचिलिन्दैरेलापत्रौ उभौ नन्दोपनन्दकौ ॥ ४३ ॥

नागशतसहस्रेभिर्ऋद्धिमद्भिर्महाबलैः ।
तेषां रक्षां करिष्यन्ति सर्वतो भयभैरवात् ॥ ४४ ॥

वली राहुर्नमुचिश्च वेमचित्रश्च संवरः ।
प्रह्लादः खरस्कन्धश्च तथान्ये चासुराधिपाः ॥ ४५ ॥

असुरशतसहस्रेभिर्ऋद्धिमद्भिर्महाबलैः ।
तेषां रक्षां करिष्यन्ति उत्पातभयभैरवात् ॥ ४६ ॥

हारीती भूतमाता च पञ्चपुत्रशतैरपि ।
तेषां रक्षां करिष्यन्ति सप्तमातृस्थितानि च ॥ ४७ ॥

चण्डा चण्डालिका चैव यक्षिणी चण्डिका तथा।
दन्ती च कूटदन्ती च सर्वसत्त्वौजहारिणी ॥ ४८ ॥

एते सर्व ऋद्धिमन्तो महाबलपराक्रमाः।
तेषां रक्षां करिष्यन्ति समन्तेन चतुर्दिशः ॥ ४९ ॥

सरस्वती च प्रमुखा देवता च अचिन्तिया।
तथा श्रीप्रमुखाश्चैव सर्वाणि देवतानि च ॥ ५० ॥

पृथिवी देवता चैव फलशस्याधिदेवता।
आरामवृक्षचैत्यानि वासिन्योनदि देवता ॥ ५१ ॥

ते सर्वे देवतासंघाः सुप्रहर्षितचेतसाः।
तेषां रक्षां करिष्यन्ति येषां सूत्रमिदं प्रियम् ॥ ५२ ॥

योजयन्ति च ते सत्त्वा आयुर्वर्णबलेन च।
श्रीपुण्यतेजलक्ष्मीभिस्ते नित्यालंकरोन्ति च ॥ ५३ ॥

ग्रहनक्षत्रपीडाश्च सर्वास्ते शमयन्ति च।
अलक्ष्मीपापदुःस्वप्नं सर्वे ते नाशयन्ति च ॥ ५४ ॥

पृथिवीदेवता चैव गम्भीरा च महाबला।
सुवर्णप्रभासोत्तमसूत्रेन्द्ररसतर्पिता ॥ ५५ ॥

अष्टषष्टिसहस्राणि शतानि योजनानि च।
यावद्वज्रतलस्थानं वर्धते पृथिवीरसैः ॥ ५६ ॥

पूर्णं च शतयोजनं पुरस्तात्संनिवर्तीति।
ऊर्ध्वं स्नेहयते मही इतः सूत्रश्रवणबलात् ॥ ५७ ॥

सर्वाश्च देवताश्चापि दशदिक्षु व्यवस्थिताः।
सुवर्णप्रभसोत्तमसूत्रेन्द्ररसतर्पिताः॥ ५८ ॥

ओजोवन्तो वरा भोन्ति लक्ष्मीवीर्यवलान्विताः।
सुखेन प्रीणिता भोन्ति नानारससमर्पिताः॥ ५९ ॥

सर्वत्र जम्बुद्वीपेऽस्मिन्फलशस्यवनदेवताः।
प्रहर्षिता भविष्यन्ति इह सूत्रे प्रकाशने॥ ६० ॥

शस्यानि च तृणान्येव विचित्रकुसुमानि च।
विचित्राः फलवृक्षाश्च रोहयन्ति समन्ततः॥ ६१ ॥

सर्वाणि फलवृक्षाणि आरामाणि वनानि च।
सुपुष्पितं करिष्यन्ति नानागन्धप्रमोदितम्॥ ६२ ॥

विचित्रेभिश्च पुष्पेभिर्विचित्रेभिः फलैरपि।
सर्वास्तृणवनस्पत्यो रोहयन्ति महीतले॥ ६३ ॥

सर्वत्र जम्बुद्वीपेऽस्मिन्नागकन्या अचिन्तियाः।
प्रहृष्टचेतसोद्भूताः पद्मिनीषूपसंक्रमन्॥ ६४ ॥

रोहयन्ति विचित्राणि सर्वासु पद्मिनीषु च।
पद्मकुमुदोत्पलानि च पुण्डरीकस्तथैव च॥ ६५ ॥

धूमात्र जालिनी मुक्तं भवते गगणं शुभम्।
तमोरजोविनिर्मुक्ता दिशो भोन्ति प्रभास्वराः॥ ६६ ॥

सूर्यः सहस्रकिरणै रश्मिजालेन सुप्रभः।
गम्भीरेणावभासेन हर्षितश्चोदयिष्यति॥ ६७ ॥

जम्बूनदसुवर्णस्य विमानान्तरसंस्थितः ।
सूर्येन्द्रदेवपुत्राश्च इतः सूत्रात् सुतर्पिताः ॥ ६८ ॥

उपयान्ति जम्बुद्वीपे सूत्रेन्द्राः संप्रहर्षिताः ।
अनन्तरश्मिजालेन भो भास्यन्ति समन्ततः ॥ ६९ ॥

सहबोधितमात्रेण रश्मिजालप्रचोदने ।
नानापद्मिनीसंछन्ना कमला बोधयिष्यन्ति ॥ ७० ॥

सर्वत्र जम्बुद्वीपेऽस्मिन्नानाशस्य फलौषधीः ।
परिपाचयन्ति सम्यक् तं चातपयते महिम् ॥ ७१ ॥

चन्द्रसूर्यौ विशेषेण अवभासेतां तदन्तरम् ।
सम्यग्वहन्ति नक्षत्रा वातवर्षं तथैव च ॥ ७२ ॥

सुभिक्षं भवते सर्वं जम्बुद्वीपे समन्ततः ।
विशेषेण च तद्राष्ट्रं यत्र सूत्रमिदं भवेत् ॥ ७३ ॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे यक्षाश्रयो नामरक्षापरिवर्तः पञ्चदशमः ॥

## ॥ दशदेवपुत्रसहस्रव्याकरणपरिवर्तः ॥

एवमुक्ते बोधिसत्त्वसमुच्चया कुलदेवता भगवन्तमेतदवोचत्। केन भदन्त भगवन् हेतुना केन कारणेन कीदृशेनोत्तप्तवीर्येण कुशलमूलेन यस्य कृतत्वादुपचितत्वादेवतानि ज्वलनान्तरतेजोराजप्रमुखानि दशदेवपुत्रसहस्राण्येतर्हि त्रायस्त्रिंशद्देवभवनादागतानि भगवतोऽन्तिके धर्मश्रवणायोपसंक्रामन्ति।

एतेषां त्रयाणां सत्पुरुषाणां बोधिसत्त्वव्याकरणं श्रुत्वा बोधौ चित्तमुत्पादयन्ति। यथायं रुचिरकेतुः सत्पुरुषोऽनागतेऽध्वनि गणनासमतिक्रान्तेष्वनेकेष्वसंख्येयकल्पकोटीनियुतशतसहस्रेष्वतिक्रान्तेषु सुवर्णप्रभासितायां लोकधातावनुत्तरां सम्यक्यंबोधिमभिसंभोत्स्यते। सुवर्णरत्नाकरच्छत्रकूटो नाम तथागतोऽर्हन्सम्यक्संबुद्धो लोक उत्पत्स्यते विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवन्। यावत्तस्य भगवतः सुवर्णरत्नाकरच्छत्रकूटस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य परिनिर्वृतस्य सद्धर्मान्तर्हिते सर्वेण सर्वे सर्वथा सर्वं तस्य शासनस्यान्तर्हितस्यायं रूप्यकेतुर्नाम दारकः। तस्य तथागतस्यानुसंघौ तत्र चैव विरजध्वजलोकधातौ सुवर्णजम्बुध्वजकाञ्चनाभो नाम तथागतोऽर्हन्सम्यक्संबुद्धो लोक उत्पत्स्यते। यावत्तस्य सुवर्णध्वजकाञ्चनावभासस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य परिनिर्वृतस्य सर्वेण सर्वे सर्वथा सर्वं तस्य शासनस्यान्तर्हितस्यायं रूप्यप्रभो दारकः। तस्य तथागतस्योनुसंघौ तत्र चैव विरजध्वजलोकधातावनुत्तरां सम्यक्संबोधिमभिसंभोत्स्यते। सुवर्णशतरश्मिप्रभासगर्भो नाम तथागतोऽर्हनसम्यक्संबुद्धो लोक उत्पस्यते विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्॥ ते सर्व एतर्हि भगवतानुत्तरायां सम्यक् संबोधौ व्याकृताः॥

न चैतेषां भदन्त भगवज्ज्वलनान्तरतेजोराजप्रमुखानां दशानां देवपुत्रसहस्राणां यावद्विस्तीर्णा बोधिसत्वचर्या अभूवन्। न षट्सु पारमितासु पूर्वं चरितवन्तः श्रुतपूर्वा अभूवन्। नयनचरणोत्तमाङ्गप्रियपुत्रभार्यादुहितरः परित्यक्तपूर्वा न श्रूयन्ते। धनधान्यहिरण्यसुवर्णमणिमुक्तावज्रवैडूर्यशङ्खशिलाप्रवाडजातरूपरजतमरकतरत्नानि परित्यक्तपूर्वाणि न श्रूयन्ते। नानान्नपानवस्त्रयानशयनासनभवनविमानारामपुष्करिणीतडागाः परित्यक्तपूर्वा न श्रूयन्ते। नानाहस्तिगोऽश्ववडवादासीदासाः परित्यक्तपूर्वा न श्रूयन्ते। यथा तान्यनेकानि बोधिसत्त्वकोटीनियुतशतसहस्राणि पूर्वेष्वसंख्येयकल्पकोटीनियुतशतसहस्रेष्वनेकानामसंख्येयतथागतकोटीनियुतशतसहस्राणामनेकाचिन्त्यैः नानाविचित्रैः पूजाशतसहस्रैः सर्वोपकरणैः पूजां करिष्यन्ति। सर्वरत्नपरित्यागानि परित्यजिष्यन्ति। करचरणनयनोत्तमाङ्गप्रियपुत्रभार्यादुहितापरित्यागानि करिष्यन्ति। धनधान्यहिरण्यसुवर्णमणिमुक्तावैडूर्यशङ्खशिलाप्रवाड-

रजतजातरूपाणि परित्यागानि परित्यजन्ति। अन्नपानवस्त्रशयनासनभवनविमानारामोद्यानपुष्करिणी-हस्तिगवाश्ववडवादासीदासपरित्यागानि परित्यक्ष्यन्ति। अनुपूर्वेण षट्पारमिताः परिपूरयिष्यन्ति। अनुपूर्वेण षट्पारमिताः परिपूरयित्वानेकानि सुखशतसहस्राण्यनुभविष्यन्ति । यावद्बुद्धेभ्यो भगवद्भ्यः तथागतनामधेये व्याकरणं प्रतिलप्स्यन्ते ॥

तत्केन भदन्त भगवन् हेतुना केन कारणेन कीदृशेनोप्तकुशलमूलेन च तानि ज्वलनान्तरतेजोराजप्रमुखानि दशदेवपुत्रसहस्राणीह भगवतोऽन्तिकं धर्मश्रवणायोपसंक्रामन्ति। तान्येतर्हि भगवतानुत्तरायां सम्यक्संबोधौ व्याकृतानि। यदुतानागतेऽध्वन्यनेकेष्वसंख्येयकल्पकोटीनियुतशतसहस्रेष्वतिक्रान्तेषु तत्रैव शालेन्द्रध्वजाग्रवत्यां लोकधातावेककुलगोत्रैकनामधेयेनानुपूर्वेणानुत्तरां सम्यक्संबोधिमभिसंभोत्स्यन्ते। प्रसन्नवदनोत्पलगन्धकूटानाम्ना दशसु दिक्षु दशबुद्धसहस्राणि लोक उत्पत्स्यन्ते विद्याचरणसंपन्नाः सुगता लोकविदोऽनुत्तराः पुरुषदम्यसारथयः शास्तारो देवानां च मनुष्याणां च बुद्धा भगवन्तः ॥

एवमुक्ते भगवांस्तां बोधिसत्त्वसमुच्चयां कुलदेवतामेतदवोचत्। अस्ति कुलदेवते सहेतुरस्ति तत्कारणम्। अस्ति तदुप्तं कुशलमूलं यस्य कृतत्वादुपचितत्वादेतानि ज्वलनान्तरतेजोराजप्रमुखानि दशदेवपुत्रसहस्राण्येतर्हि त्रायस्त्रिंशद्भवनादिह धर्मश्रवणायोपसंक्रामन्ति। एतेषां त्रयाणां सत्पुरुषाणामिदं बोधिव्याकरणं श्रुत्वा सहश्रवणेन कुलदेवतेऽस्य सुवर्णप्रभासोत्तमस्य सूत्रेन्द्रराजस्यान्तिके चित्रीकारप्रीतिप्रसादप्रतिलब्धा भवन्ति। तावद्विमलवैडुर्यसदृशेन परिशुद्धचित्तेन समन्वागता भवन्ति। विमलविपुलविस्तीर्णगगणकल्पसदृशेन गम्भीरेण चित्तप्रसादेन समन्वागता भवन्ति। अपरिमितं च पुण्यस्कन्धं परिगृहीतवन्तो भवन्ति तावच्चैत्यदैवते ज्वलनान्तरतेजोराजप्रमुखानि दशदेवपुत्रसहस्राणि सहश्रवणेनास्य सूत्रेन्द्रराजस्यान्तिके चित्रीकारप्रसादप्रतिलब्धा भवन्ति। तावद्विमलवैडूर्यसदृशेन परिशुद्धेन चित्तेन समन्वागता भवन्ति यावद्याकरणभूमिमनुप्राप्ताः। अनेन कुलदेवते धर्मश्रवणकुशलमूलप्रचयेनापि पूर्वप्रणिधानवशेनैतानि ज्वलनान्तरतेजोराजप्रमुखानि दशदेवपुत्रसहस्राण्येतर्ह्यनुत्तरायां सम्यक्संबोधौ व्याकृतानि। कतमानि च कुलदेवते पूर्वप्रणिधानानीति।

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे दशदेवपुत्रसहस्रव्याकरणपरिवर्तः षोडशः ॥

# ॥ व्याधिप्रशमनपरिवर्तः ॥

भूतपूर्वं कुलदेवतेऽतीतेऽध्वन्यसंख्येयतरैर्विपुलैरचिन्त्यैरप्रमेयैर्यदासीत्तेन कालेन तेन समयेन रत्नशिखी नाम तथागतोऽर्हन्सम्यक्संबुद्धो लोक उत्पन्नो विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्। तेन खलु पुनः कुलदेवते कालेन तेन समयेन तस्य भगवतो रत्नशिखिनस्तथागतस्यार्हतः सम्यक्संबुद्धस्य परिनिर्वृतस्य सद्धर्मस्यान्तर्हितस्य सद्धर्मप्रतिरूपके परिवर्तमाने सुरेश्वरप्रभो नाम राजा बभूव। धार्मिको धर्मराजो धर्मेण राज्यं पालयमानो नाधर्मेण मातापितृकल्पः सर्वविषयवासिनां सत्त्वानाम्॥

तेन खलु पुनः कुलदेवते कालेन तेन समयेन तस्य राज्ञः सुरेश्वरप्रभस्य विषये जटिंधरो नाम श्रेष्ठी बभूव ॥

वैद्यः चिकित्सकः परमधातुकुशलोऽष्टाङ्गेनायुर्वैद्यशास्त्रेण समन्वागतो बभूव। तेन खलु कुलदेवते कालेन तेन समयेन तस्य जटिंधरस्य श्रेष्ठिनो जलवाहनो नाम्ना श्रेष्ठिपुत्र उत्पन्नो बभूव। अभिरूपः प्रासादिको दर्शनीयः परमया शुभवर्णपुष्करतया समन्वागतो नानाशास्त्रकुशलः सर्वशास्त्रगतिंगतो लिपिसंख्यागणनाकुशलः सर्वशिल्पी बभूव। तेन खलु पुनः कुलदेवते कालेन तेन समयेन तस्य राज्ञः सुरेश्वरप्रभस्य विषयेऽनेकानि सत्त्वशतसहस्राणि नानारोगस्पृष्टान्यभूवन्। नानाव्याधिपरिपीडितानि दुःखां तीव्रां खरां कटुकाममनापां वेदनां वेदयन्ति ॥

तेन खलु पुनः कुलदेवते कालेन तेन समयेन तस्य जलवाहनस्य श्रेष्ठिपुत्रस्य तेषामनेकेषां सत्त्वशतसहस्राणां नानारोगस्पृष्टानां नानाव्याधिपरिपिडितानामर्थाय परमकारुण्यं चित्तमुत्पन्नो बभूव। एतान्यनेकानि सत्त्वशतसहस्राणि नानारोगस्पृष्टानि नानाव्याधिपरिपीडितान्येतर्हि दुःखां तीव्रां खरां कटुकाममनापां वेदनां वेदयन्ति। अयं च मम पिता जटिंधरः श्रेष्ठी वैद्यविचिकित्सकः परमधातुकुशलोऽष्टाङ्गायुर्वैद्यशास्त्रेण समन्वागतो वृद्धो जीर्णो महल्लकोऽध्वगतो वयोऽनुप्राप्तो जीर्णमवस्थाप्य प्रवेपमाणः कायो यष्टिमालम्ब्य यत्र यत्र सर्वत्र ग्रामनगरनिगमराष्ट्रराजधानीषूपसंक्रामति। एतान्यनेकानि सत्त्वशतसहस्राणि नानारोगस्पृष्टानि नानाव्याधिपरिपीडितानि नानाव्याधोभ्यः परिमोचयितुं यं नूनमहमिममेव पितरं जटिंधरमुपसंक्रमित्वाधिकौशल्यं परिपृच्छेयम्। येन धातुकौशल्येन परिपृष्टेनाहं सर्वत्र ग्रामनगरनिगमजनपदराष्ट्रराजधानीषूपसंक्रमिष्यामि। उपसंक्रम्य तान्यनेकानि सत्त्वशतसहस्राणि नानारोगस्पृष्टानि नानाव्याधिपरिपीडितानि नानाव्याधिभ्यः परिमोचयिष्यामि।

तेन खलु पुनः कुलदेवते कालेन तेन समयेन जलवाहनः श्रेष्ठिपुत्रो येन स्वपिता जटिंधरः श्रेष्ठी तेनोपजगाम। उपेत्य स्वपितुर्जटिंधरस्य पादौ शिरसा वन्दित्वा कृताञ्जलिपुटो भूत्वैकान्तेऽस्थात्। एकान्ते स्थितो जलवाहनः श्रेष्ठिपुत्रः स्वपितरं जटिंधरं श्रेष्ठिनमिमाभिर्गाथाभिर्धातुकौशल्यं पृच्छति स्म ॥

तानीन्द्रियाणि लक्षन्ते परिवर्तन्ति धातवः।
केन कालेन जायन्ते व्याधयश्च शरीरिणाम्॥ १॥

भोजनं च कथं भुक्त्वा काले काले सुखावहम्।
येनान्तरशरीरस्य कायोऽग्निनोपहन्यते ॥ २॥

कथं चिकित्सा कर्तव्या वाते पित्ते श्लेष्मिके तथा।
संनिपाते समुत्पन्ने कथं व्याधिशान्तये ॥ ३॥

किं काले कुप्यते वातः पित्तं कुप्यते कदा।
किं काले कुप्यते श्लेष्मा येन पीड्यन्ति मानवाः॥ ४॥

अथ खलु जटिंधरः श्रेष्ठी जलवाहनस्य श्रेष्ठिपुत्रस्याभिर्गाथाभिर्धातुकौशल्यं विदित्वा देशयते स्म ॥

वर्षा चात्र त्रयो मासास्त्रयश्च शारदं स्मृतम्।
त्रयस्तथैव हेमान्तस्त्रयश्च ग्रीष्मिकस्तथा ॥ ५॥

इत्येव मासक्रमः षड्तूनि
संवत्सरद्वादशमासिकं स्मृतम्।
अन्नं च पानं च तथा च जीर्यते
वैद्याश्च कौशल्यस्मृतिप्रदर्शिताः॥ ६॥

ते चापि संवत्सरपर्वमन्तरे
परिवर्तन्तीन्द्रियधातवोऽपि।
परिवर्तमानानि च इन्द्रियाणि
विचित्रव्याधिर्भवते शरीरिणाम्॥ ७॥

तत्रैव वैद्यस्य चतुः प्रकारं
त्रिमासपर्वान्तरे षड्टूनि ।
षड्धातुकौशल्यप्रजानितव्यं
यथाक्रमं भोजनमौषधं च ॥ ८ ॥

वाताधिकाराः प्रभवन्ति वर्षे
पत्तिप्रकोपः शरदि प्रसन्ने ।
हेमन्तकाले तथ संनिपातं
कफाधिकाराश्च भवन्ति ग्रीष्मे ॥ ९ ॥

स्निग्धोष्णलवणाम्लरसाश्च वर्षे
शरत्सु स्निग्धं मधुरं च शीतम् ।
मधुराम्लस्निग्धं च हेमन्तकाले
रूक्षोष्णकटुकानि च ग्रीष्मकाले ॥ १० ॥

कफाधिकः कुप्यति भुक्तमात्रे
पित्ताधिकं कुप्यति जीर्यमाणे ।
वाताधिकः कुप्यति जीर्णमात्रे
इत्येव धातुत्रितयप्रकोपः ॥ ११ ॥

संबृहणं कुर्वतु निरात्मकस्य
विरेचनं पित्तविवर्धनं च ।
त्रिगुणोपपन्नं तथ संनिपाते
प्रशमं च कुर्यात्कफपर्वमन्तरे ॥ १२ ॥

वाताधिकं पैत्तिकसन्निपाते
कफाधिकं पर्वसु जानितव्यम् ।
यत्काल यद्धातु यदाश्रयं च
तदन्नपानौषधि दर्शितव्यमिति ॥ १३ ॥

अथ खलु जलवाहनः श्रेष्ठिपुत्रस्तेनैवंरूपेण नैमित्तिकेन धातुकौशल्येन परिपृष्टेन सर्वाष्टाङ्गायुर्वैद्यमधिगतोऽभूत्। तेन खलु पुनः कुलदेवते कालेन तेन समयेन जलवाहनः श्रेष्ठिपुत्रो राज्ञः सुरेश्वरप्रभस्य विषये सर्वग्रामनगरनिगमजनपदराष्ट्रराजधानीषूपसंक्रमित्वा सर्वेषामनेकेषां सत्त्वशतसहस्राणां नानारोगस्पृष्टानां नानाव्याधिपरिपीडितानामेवमाश्वासयामास। मा भैषुर्वैद्योऽस्मि वैद्योऽस्मीत्यात्मानं प्रतिज्ञातवानहं युष्माकं नानाव्याधिभ्यः परिमोचयिष्यामि। सहश्रवणेन कुलदेवते तस्य जलवाहनस्य श्रेष्ठिपुत्रस्येदमेवंरूपं वचनं व्याहरमाणस्य सर्वाणि तान्यनेकानि सत्त्वकोटीनियुतशतसहस्राणि महाप्रहर्षजातानि बभूवुः। आश्वासप्राप्तान्यचिन्त्यप्रीतिसौमनस्येन समन्वागतानि बभूवुः। तानि तेन कालेन तेन समयेन तया प्रहर्षयानेकानि सत्त्वकोटीनियुतशतसहस्राणि नानारोगस्पृष्टानि नानाव्याधिपरिपीडितानि नानारोगेभ्यः परिमोचयितान्यरोगाणि च बभूवुर्विगतव्याधीनि च। यथा पौराणेन स्थामबलवीर्येण समन्वागतानि बभूवुः। तेन खलु पुनः कुलदेवते कालेन तेन समयेन तेषामनेकेषां च सत्त्वकोटीनियुतशतसहस्राणां नानारोगस्पृष्टानां नानाव्याधिपरिपीडितानां ये केचिद्गाढतरेण स्पृष्टा च बभूवुः। ते सर्वे येन जलवाहनः श्रेष्ठिपुत्रस्तेनोपसंक्रान्त उपसंक्रम्यैव ये च किंचित्तेषां सत्त्वकोटीनियुतशतसहस्राणां नानारोगस्पृष्टानां नानाव्याधिपरिपीडितानामौषधिविधानान्यभिनिर्दिशन्ति स्म। तत्तासु राजधानीषु सर्वाणि तान्यनेकानि सत्त्वकोटीनियुतशतसहस्राणि नानारोगस्पृष्टानि नानाव्याधिपरिपीडितानि जलवाहनेन श्रेष्ठिपुत्रेण नानाव्याधिभ्यः परिमोचितानि बभूवुरिति॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे व्याधिप्रशमन परिवर्तो नाम सप्तदशः॥

## ॥ जलवाहनस्य मत्स्यवैनेयपरिवर्तः ॥

पुनरपरं कुलदेवते राज्ञः सुरेश्वरप्रभस्य विषये जलवाहनेन श्रेष्ठिदारकेण सर्वसत्त्वा आरोगाः कृता अल्पा बाधा यथापूर्वेणोत्साहबलकायेन संवृताः सर्व उत्साहसुखेन रमन्ति स्म। क्रीडन्ति स्म। परिचारयन्ति स्म। दानानि च ददन्ति स्म। पुण्यानि च कुर्वन्ति स्म। जलवाहनः श्रेष्ठिदारको महावैद्यदानानां च सुखानां व्याधिविचिकित्सको नियतप्रत्यक्षेण बोधिसत्त्वेन भवितव्यम्। सर्वेनाष्टाङ्गायुर्वैद्यमधिगतोऽभूत्। तस्य खलु पुनः जलवाहनस्य श्रेष्ठिदारकस्य जलाम्बुजगर्भा नाम भार्याऽभूत्। तस्य खलु पुनः कुलदेवते जलाम्बुजगर्भाया द्वौ दारकौ पुत्रावभूताम्। एको जलाम्बरो नाम द्वितीयो जलगर्भो नाम ॥

अथ खलु पुनः कुलदेवते जलवाहनः श्रेष्ठिपुत्रस्याभ्यां दारकाभ्यां सार्धमनुपूर्वेण ग्रामनगरनिगमजनपदराष्ट्रराजधानीष्वनुचङ्क्रमति ॥

अथ खलु पुनः कुलदेवतेऽपरेण तेन कालेन तेन समयेन जलवाहनः श्रेष्ठिपुत्रोऽन्यतरमटवीकान्तारप्राप्तोऽध्वनि ददर्शात्रान्तरे मांसभक्षा वृकशृगालकाकपक्षिणस्तां दिशं धावन्ति यत्राटवीकान्तारेऽटवीसंभवा पुष्करिणी। तद्दटष्ट्वा तस्यैतदभूत्। कस्यार्थमिमे मांसभक्षा वृकशृगालकाकपक्षिण इमां दिशं धावन्ति। तस्यैतदभूत्। यं नूनमहं तां दिशमुपसंक्रमेयम्। यस्यां दिशीमे मंसभक्षाश्च वृकशृगालकाकपक्षिणो धावन्ति ॥

अथ खलु पुनः कुलदेवते जलवाहनः श्रेष्ठिपुत्रोऽनुपूर्वेणानुचङ्क्रमन्ननुविचरन्यत्राटवीसंभवा पुष्करिणी तत्र संप्राप्तः। तत्र महापुष्करिण्यां दशमत्स्यसहस्राणि प्रतिवसन्ति स्म। स तत्रापश्यद्बहूनि मत्स्यशतानि जलविप्रहीणानि तत्रास्य कारुण्यचित्तमुत्पन्नम्। तत्राद्राक्षीदर्धकायां देवतां निष्क्रमन्तीम्। सा च देवता जलवाहनं श्रेष्ठिदारकमेतदवोचत्। साधु साधु कुलपुत्र यस्त्वं जलवाहनो नाम मत्स्यानामुदकं प्रयच्छ। द्वाभ्यां कारणाभ्यां जलवाहन इत्युच्यते। यश्चोदकं वाहयति ततः स्वनामानुरूपं कुल। जलवाहनः प्राह। कियन्तीमानि देवते मत्स्यानि। देवता प्राह। परिपूर्णानि दशमत्स्यसहस्राणि ॥

अथ खलु कुलदेवते जलवाहनस्य श्रेष्ठिदारकस्य भूयस्या मात्रया परमकारुण्यचित्तमुत्पन्नम्। तेन खलु पुनः कुलदेवते समयेनाटवीसंभवायां पुष्करिण्या किंचिन्मात्रमवशिष्टमुदकमभूत्। तानि दशमत्स्यसहस्राणि मृत्युमुखप्रविष्टानि  जलविप्रहीणानि धावन्ति ॥

अथ खलु कुलदेवते जलवाहनः श्रेष्ठिदारकश्चतुर्दिशं धावति स्म। यस्यां दिशि जलवाहनः श्रेष्ठिदारकोऽनुचङ्क्रमति तस्यां दिशि दशमत्स्यसहस्राणि जलवाहनं करुणं प्रेक्षन्ते ॥

अथ खलु कुलदेवते जलवाहनः श्रेष्ठिदारकश्चतुर्दिशं धावति स्म। उदकं प्रेषयमाणो न चैवात्रोदकमुपलभ्यते। चतुर्दिशं प्रेक्षते। सोऽद्राक्षीन्नातिदूरे महान्तं वृक्षसमूहं तं वृक्षमभिरुह्य द्रुमशाखाञ्छित्त्वा येन सा पुष्करिणी तेनोपजगाम। उपगम्य तेषां दशानां मत्स्यसहस्राणां द्रुमशाखाभिः सुशीतलाञ्छायां कृतवान् ॥

अथ खलु कुलदेवते जलवाहनः श्रेष्ठिदारकस्तस्यां पुष्करिण्यामुदकागमं पर्येषते कुत उदकस्यागमनं भवेत्। चतुर्दिशं धावति न चोदकमुपलभ्यते। स शीघ्रं शीघ्रं तमुदकस्रोतं समनुगच्छति। तस्याः खलु पुनः कुलदेवते अटवीसंभवायाः पुष्करिण्या जलागमा नाम महानदी यतस्तस्यामुदकस्यागमनम्। तेन च समयेन सा न्यन्यतरेण पापसत्त्वेन तेषां दशानां मत्स्यसहस्राणामर्थेन सा नदीत्यद्दृष्टे स्थाने महाप्रपाते पातिता यत्तेषां मत्स्यानां न भूय उदकस्यागमनं भविष्यति। स तं दृष्ट्वा चिन्तयति न शक्यत एषा नदी जनसहस्रेणापि तेनैव यथा वाहयितुं किमङ्ग पुनर्मयैकेन शक्यो बाहयितुं स प्रतिनिवृत्तः ॥

अथ खलु कुलदेवते जलवाहनः श्रेष्ठिपुत्रः शीघ्रं शीघ्रमुपसंक्रान्तो येन राजा सुरेश्वप्रभस्तेनोपजगाम। उपगम्य राज्ञः सुरेश्वरप्रभस्य पादौ शिरसा नत्वैकान्ते निषण्णः। इमां प्रकृतिमारोचयाति स्म। मया खलु देवस्य विषये सर्वग्रामनगरनिगमजनपदराष्ट्रराजधानीषु सत्त्वानां व्याधयः प्रशमिताः। तत्रामुष्मिन्स्थानेऽटवीसंभवा नाम पुष्करिणी। तत्र दशमत्स्यसहस्राणि प्रतिवसन्ति जलप्रहीणान्यादित्यपरितापितानि। तद्ददातु मे देवो विंशतिगजा यथा तेषां तिर्यग्योनिगतानां जीवितं ददामीति। यथा मनुष्याणां दत्तमाज्ञप्तं खलु राज्ञा सुरेश्वरप्रभेणामात्यानां ददत महावैद्यराजस्य विंशतिगजान्। अमात्या आहुः। उपसंक्रम महासत्त्व येन हस्तिशाला उपगृह्णीष्व विंशतिगजान् कुरु सत्त्वानां सुखम् ॥

अथ खलु कुलदेवते जलवाहनः सार्धं जलाम्बरेण च स्वपुत्रेण विंशतिगजान् गृहीत्वा नागशौण्डिकानां सकाशाच्छतशो दृशीनां प्रतिगृह्य प्रतिनिवृत्तः। यत्र जलागमा नाम महानदी प्रवहति। तत्रोपसंक्रम्योदकेन ता दृतीः पूरयित्वा गजपृष्ठ उदकमारोप्य शीघ्रं शीघ्रं येनाटवीसंभवा पुष्करिणी तेनोपसंक्रान्तः। उपसंक्रम्य तदुदकं हस्तिपृष्ठादवतार्य तां पुष्करिणीं चतुर्दिशमुदकेन पूरयित्वा चतुर्दिशं च क्रमति। येन येन जलवाहनोऽनुचङ्क्रमति तेन तेन दशमत्स्यसहस्राण्यनुधावन्ति ॥

अथ खलु कुलदेवते जलवाहनस्यैतदभवत्। किमर्थमेतानि दशमत्स्यसहस्राणि येनाहं तेन प्रधावन्ति। तस्य पुनरेतदभवत्। नूनमेते मत्स्याः क्षुधाग्निना परिपीडिता मम सकाशाद्भोजनं परिमार्गयन्ति। यन्नूनमहं भोजनं प्रयच्छेयम्॥

अथ खलु कुलदेवते जलवाहनः स्वपुत्रं जलाम्बरमेतदवोचत्। गच्छ कुलपुत्र स्वकं निवेशनं सर्वबलतरं हस्तिनमभिरूह्य च शीघ्रं शीघ्रमुपसंक्रम्य पितामहस्य श्रेष्ठिन एवं वदेह भो तात जलवाहन एवं वदति यत्किंचिदत्र गृहेऽभिसंस्कृतं भोजनं स्यान्मातापित्रोर्भ्रातृभगिन्योर्दासीदासकर्मकरस्य कृतशः सर्वमेकत्र पिण्डीकृत्वा जलाम्बरस्य हस्तिपृष्टमवरोप्य जलवाहनाय शीघ्रं शीघ्रं विसर्जय॥

अथ खलु जलाम्बरो दारको हस्तिनमभिरुह्य शीघ्रं शीघ्रं धावति स्म। येन स्वकं निवेशनं तेनोपसंक्रामदुपसंम्यैतां प्रकृतं पितामहस्याग्र आरोचयामास विस्तरेण यथा पूर्वोक्तम्। तत्सर्वं पितामहेन जलाम्बराय विसर्जितम्॥

अथ खलु जलम्बरो दारकस्तद्भोजनं हस्तिपृष्ठमुपनाम्य हस्तिनमभिरुह्य येनाटवीसंभवा पुष्करिणी तेनोपसंक्रामत्॥

अथ खलु जलवाहनः स्वकं पुत्रं जलाम्बरमागतं दृष्ट्वा हृष्टस्तुष्ट उदग्रः पुत्रस्यान्तिकाद्भोजनं प्रतिगृह्य च्छित्त्वा तत्र पुष्करिण्यां प्रक्षिपति स्म। तेनाहारेण तानि दशमत्स्यसहस्राणि संतर्पितानि। पुनस्तस्यैतदभवत्। श्रुतं मे परेण कालसमयेनारण्यायतने भिक्षुर्महायानधारयमान इत्याह। यो रत्नशिखिनस्तथागतस्यार्हतः सम्यक्संबुद्धस्य मरणकालसमये नामधेयं शृणुयात्। स स्वर्गलोक उपपत्स्यतीति। यन्नूनमहमेषां मत्स्यानां गम्भीरं प्रतीत्यसमुत्पादं धर्मं देशयेयम्। रत्नशिखिनस्तथागतस्यार्हतः सम्यक्संबुद्धस्य नामधेयं श्रावयेयम्। तेन च समयेन तस्मिञ्जम्बुद्वीपे द्विधादृष्टिः सत्त्वानामभूत्। केचिन्महायानमभिश्रद्धयन्ति केचित्क्लेशयन्ति॥

अथ खलु पुनर्जलवाहनः श्रेष्ठिपुत्रस्तस्यां वेलायामुभौ पादौ जानुमात्रं तत्र पुष्करिण्यां प्रवेश्यैवं चिदानमुदानयामास। नमस्तस्य भगवतो रत्नशिखिनस्तथागतस्यार्हतः सम्यक्संबुद्धस्य पुर्वबोधिसत्त्वचर्यां चरमाणस्य एवं प्रणिधानमभूत्। ये केचिद्दशसु दिक्षु मरणकालसमये मम नामधेयं शृणुयुस्ते ततश्च्युत्वा देवानां त्रायस्त्रिंशानां सभागतायामुपपद्येयुः॥

अथ खलु जलवाहनः श्रेष्ठिदारकस्तेषां तिर्यग्योनिगतानामिमं धर्मं देशयति स्म। यदुतास्मादिदं भवत्यस्योत्पादादिदमुत्पद्यते। यदुताविद्याप्रत्यया संस्कारा। संस्कारप्रत्ययं विज्ञानम्। विज्ञानप्रत्ययं

नामरूपम्। नामरूपप्रत्ययं षडायतनम्। षडायतनप्रत्यय स्पर्शः। स्पर्शप्रत्यया वेदना। वेदनाप्रत्यया तृष्णा। तृष्णाप्रत्ययमुपादानम्। उपादानप्रत्ययो भवः। भवप्रत्यया जातिः। जातिप्रत्यया जरामरण-शोकपरिदेवदुःखदौर्मनस्योपायासा भवत्येवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति यदुताविद्यानिरोधात्संरकारनिरोधः। संस्कारनिरोधाद्विज्ञाननिरोधः। विज्ञाननिरोधान्नामरूपनिरोधः। नामरूपनिरोधात्षडायतननिरोधः। षडायतननिरोधात्स्पर्शनिरोधः। स्पर्शनिरोधाद्वेदनानिरोधः। वेदना-निरोधात्तृष्णानिरोधः। तृष्णानिरोधादुपादाननिरोधः। उपादाननिरोधाद्भवनिरोधः। भवनिरोधाज्जाति-निरोधः। जातिनिरोधाज्जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासा निरुध्यते। केवलमस्य महतो दुःख-स्कन्धस्य निरोधो भवति। इति हि कुलदेवते तेन कालेन तेन समयेन जलवाहनः श्रेष्ठिपुत्रस्तेषां तिर्यग्योनिगतानामिमां धार्मिककथां कथयति स्म। सार्धं पुत्राभ्यां जलाम्बरेण जलगर्भेण च पुनरपि स्वगृहमनुप्राप्तः॥

अथापरेण कालेन समयेन जलवाहनः श्रेष्ठिपुत्रो महोत्सवं परिभुज्य महोत्सवमत्तो शयने शयितः। तेन च कालेन तेन समयेन महानिमित्तः प्रादुर्भूतः। यत्तस्या रात्र्यामत्ययेन तानि दशमत्स्यसहस्राणि कालगतानि देवेषु त्रायस्त्रिंशत्सु सभागतायामुपपन्नानि। सहोपपन्नानां चैषामेवंरूपश्चेतसः परिवितर्क उत्पन्नः। केन वयं कुशलकर्महेतुनेह देवेषु त्रायस्त्रिंशेषूपपन्नाः। तेषामेतदभूत्। वयमस्मिञ्जम्बुद्वीपे दशमत्स्यसहस्राण्यभूवन्। ते वयं तिर्यग्योनिगता जलवाहनेन श्रेष्ठिदारकेण प्रभूतेनोदकेन संतर्पिता भोजनवरेण च। गम्भीरश्चास्माकं प्रतीत्यसमुत्पादधर्मो देशितः। रत्नशिखिनस्तथागतस्यार्हतः सम्यक्संबुद्धस्य नामधेयं श्राविताः। तेन कुशलधर्महेतुना तेन प्रत्ययेनेह वयं देवेषूपपन्नाः। यन्नूनं वयं येन जलवाहनः श्रेष्ठिदारकस्तेनोपसंक्रमेमः। उपसंक्रम्य तस्य पूजां करिष्यामः।

अथ तानि दशदेवपुत्रसहस्राणि देवेषु त्रायस्त्रिंशत्स्वन्तर्हितानि जलवाहनस्य श्रिष्ठिनो गृहे तस्थुः। तेन खलु पुनः समयेन च जलवाहनः श्रेष्ठ्युपशयने शयितः। तस्यैतैर्देवपुत्रैर्दशमुक्ताहारसहस्राणि शीर्षान्ते स्थापितानि। दशमुक्ताहारसहस्राणि पादतले स्थापितानि। दशमुक्ताहारसहस्राणि दक्षिणपार्श्वे स्थापितानि। दशमुक्ताहारसहस्राणि वामपार्श्वे स्थापितानि। गृहान्तरे जानुमात्रं मान्दारवपुष्पवर्षं प्रावर्षत्। दिव्याश्च दुन्दुभयः पराहताः। येन सर्वे जम्बुद्वीताः प्रतिविबुद्धाः। अथ जलवाहनः श्रेष्ठी प्रतिविबुद्धं॥

अथ तानि दशदेवपुत्रसहस्राणि खगपथेनोपक्रान्तानि। ते च देवपुत्रा राज्ञः सुरेश्वरप्रभस्य विषये स्थानस्थानान्तरे मान्दारवपुष्पवर्षं प्रवर्षयन्तो येनाटवीसंभवा पुष्करिणी तेनोपसंक्रान्ताः ते तत्र पुष्करिण्यां मान्दारवपुष्पं प्रवर्षयन्तस्तत एवान्तर्हिताः पुनरपि देवालयं गताः। तत्र पञ्चभिः कामगुणै

रमन्ति स्म। क्रीडन्ति स्म। परिचालयन्ति स्म। महतीं श्रीसौभाग्यतामनुभवन्ति स्म। जम्बुद्वीपे च रात्रीप्रभाताभूत्॥

अथ खलु राजा सुरेश्वरप्रभो गणकमहामात्यान्पृच्छति। किमर्थमद्य रात्रावेतानि निमित्तानि प्रादुर्भूतानि। तेऽवोचन्। यत्खलु देवो जानीयात्। जलवाहनस्य श्रेष्ठिदारकस्य चत्वारिंशन्मुक्ताहार-सहस्राणि प्रवर्षितानि दिव्यानि च मान्दारवपुष्पाणि निर्गच्छन्ति। राजाह। भवन्तो जलवाहनं श्रेष्ठिनं दारकं प्रियवचनेन शब्दापयन्॥

अथ ते गणकमहामात्या येन जलवाहनस्य गृहं तेनोपसंक्रान्ताः। उपसंक्रम्य जलवाहनस्य श्रेष्ठिन एतदवोचन्। राजा सुरेश्वरप्रभस्त्वामामन्त्रयते। अथ जलवाहनः श्रेष्ठी महामात्यैः सार्धं येन राजा सुरेश्वरप्रभस्तेनोपजगाम। उपसंक्रम्यैकान्ते निषण्णः। राजा पृच्छति। जलवाहन किं निमित्तं जानीया यदद्य रात्रावीदृशानि शुभनिमित्तानि प्रादुर्भूतानि। अथ जलवाहनः श्रेष्ठी सुरेश्वरप्रभ-स्यैतदवोचत्। जानाभि देव नियतं दशमत्स्यसहस्राणि कालगतानि। राजाह। कथं जानासि। जल-वाहन आह। गच्छतु देव जलाम्बरस्तां महापुष्करिणीं प्रविशतु। किं तानि दशम्त्स्यसहस्राणि जीवन्ति अथ कालगतानि। राजाह। एवमस्तु॥

अथ जलवाहनः श्रेष्ठिदारको जलाम्बरं दारकमेतदवोचत्। गच्छ कुलपुत्राटवीसंभवायां पुष्करिण्यां पश्य। किं तानि दशमत्स्यसहस्राणि जिवन्ति अथ कालगतानि। अथ जलाम्बरो दारकः शीघ्रं शीघ्रं येनाटवीसंभवा पुष्करिणी तेनोपजगाम। उपसंक्रम्य ददर्श। तानि दशम्त्स्यसहस्राणि कालगतानि महान्तं च मान्दारवपुष्पवर्षं दृष्ट्वा पुनरपि निवृत्तः पितुरेतदवोचत्। कालगतानीति। अथ जलवाहनः श्रेष्ठी दारको जलम्बरस्य दारकस्यान्तिकादिदं वचनं श्रुत्वा येन राजा सुरेश्वरप्रभस्तेनोपसंक्रम्यैतां प्रकृतिमारोचयति स्म। यत्खलु देवो जानीयात्तानि दशम्त्स्यसहस्राणि सर्वाणि कालगतानि देवेषु त्रायस्त्रिंशत्स्वुपपन्नानि। तेषां देवपुत्राणामनुभावेनाद्य रात्राविदृशानि शुभनिमित्तानि प्रादुर्भूतानि। यदस्माकं गृहे चत्वारिंशन्मुक्ताहारसहस्राणि दिव्यानि च मान्दारवपुष्पाणि प्रवर्षितानि। अथ स राजा हृष्टस्तुष्ट उदग्रात्तमना बभूव॥

अथ खलु भगवान्पुनस्तां बोधिसत्त्वसमुच्चयां कुलदेवतामेतदवोचत्॥ स्यात्खलु पुनर्युष्माकं कुलदेवतेऽन्यः स तेन कालेन तेन समयेन सुरेश्वरप्रभो नाम राजा बभूव। न खलु पुनरेवं द्रष्टव्यम्। तत्कस्य हेतोः। दण्डपाणिः शाक्यस्तेन कालेन तेन समयेन सुरेश्वरप्रभो नाम राजा बभूव। स्यात्खलु पुनः कुलदेवतेऽन्यः स तेन कालेन तेन समयेन जटिंधरो नाम श्रेष्ठी बभूव। न खलु पुनरेवं द्रष्टव्यम्। तत्कस्य हेतोः। राजा शुद्धोदनः स तेन कालेन तेन समयेन जटिंधरो नाम श्रेष्ठ्यभूत्॥

स्यात्खलु पुनस्ते कुलदेवतेऽन्यः स तेन कालेन तेन समयेन जलवाहनः श्रेष्ठिदारकोऽभूत्। न खलु पुनरेवं द्रष्टव्यम्। तत्कस्य हेतोः। अहं स तेन कालेन तेन समयेन जलवाहनः श्रेष्ठिदार-कोऽभूत्॥ स्यात्खलु पुनस्ते कुलदेवतेऽन्या सा तेन कालेन तेन समयेन जलवाहनस्य जलाम्बुजगर्भा नाम भार्याभूत्। न खलु पुनरेवं द्रष्टव्यम्। तत्कस्य हेतोः। गोपा नाम शाक्यकन्या तेन कालेन समयेन जलवाहनस्य जलाम्बुजगर्भा नाम भार्याभूत्। राहुलभद्रस्तेन कलेन तेन समयेन जलाम्बरो नाम दारकोऽभूत्। आनन्दः स तेन कालेन तेन समयेन जलगर्भो नाम दारकोऽभूत्। स्यात्खलु पुनस्ते कुलदेवतेऽन्यानि तानि तेन कालेन तेन समयेन दशमत्स्यसहस्राणि बभूवः। न पुनरेवं द्रष्टव्यम्। तत्कस्य हेतोः। अमूनि तानि ज्वलनान्तरतेजोराजप्रमुखानि दशदेवपुत्रसहस्राणि तेन कालेन तेन समयेन दशमत्स्यसहस्राणि बभूवुः। यानि मयोदकेन संतर्पितानि। भोजनवरेण च गम्भीरश्च प्रतीत्यसमुत्पादो धर्मो देशितः। रत्नशिखिनस्तथागतस्यार्हतः सम्यक्संबुद्धस्य नामधेयं श्रावितः। तेन कुशलधर्महेतुना ममान्तिक इहागतानि येनैतर्ह्यनुत्तरायां सम्यक्संबोधौ व्याकृतानि। अतीव प्रीतिप्रासादप्रामोद्येन धर्मश्रुतिगौरवेण सर्वव्याकरणनामधेयानि प्रतिलब्धानीति॥

स्यात्खलु पुनस्ते कुलदेवतेऽन्या सा तेन कालेन तेन समयेन वृक्षदेवताभूत्। नैवं द्रष्टव्यम्। तत्कस्य हेतोः। त्वमभूः कुलदेवते तेन कालेन तेन समयेन वृक्षदेवता। अनेन कुलदेवते पर्यायेणैवं वेदितव्यम्। यथा मया संसारे संसरता बहवः सत्त्वाः परिपाचिता बोधौ। ये ते सर्वे व्याकरणभूमिं प्रतिलप्स्यन्तेऽनुत्तरायां सम्यक्संबोधाविति॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे जलवाहनस्य मत्स्यवैनेयपरिवर्तोऽष्टादशः।

# ॥ व्याघ्रीपरिवर्तः ॥

पुनरपरं कुलदेवते परहितार्थायात्मपरित्यागमपि बोधिसत्त्वभूतेन भवितव्यम्। तत्कथमिदम्। दिवि भुवि च विसृतविपुलविमलविविधगुणशतकिरणोऽप्रतिहतज्ञानदर्शनबलपराक्रमो भगवान्भिक्षुशतसहस्रपरिवृतः पञ्चविधचक्षुप्राप्तः प्रञ्चालेषु जनपदेषु जनपदचारिकां चरमाणोऽन्यतमेव वनखण्डमनुप्राप्तो बभूव। स तत्र ददर्श हरितमृदुनीलशाद्वलतलविविधकुसुमप्रतिमण्डितं पृथिवीप्रदेशं दृष्ट्वा च भगवानायुष्मन्तमानन्दमामन्त्रयति स्म। रुचिरोऽयमानन्द ! पृथिवीप्रदेशः। अस्मिंश्चास्मिकस्थाननिष्ठा संज्ञायते। एतर्हि तथागतस्यासनं प्रज्ञापय। ततस्येन भगवत आज्ञयासनं प्रज्ञप्तम्। प्रज्ञप्य च भगवन्तमेतदवोचत्। प्रज्ञप्तमासनं भगवन्निषीद ज्येष्ठ श्रेष्ठ नृणां वरद वरिष्ठ मोक्षवह परमामृतकथां विसृज नृणां हिताय भगवन्निधनविप्रयुक्तं। अथ भगवांस्तस्मिन्नासने निषद्य भिक्षूनामन्त्रयते स्म। इच्छथ यूयं भिक्षवो दुष्करकारिकाणां बोधिसत्त्वानां शरीराणि द्रष्टुम्॥

एवमुक्ते भिक्षवो भगवन्तमेतदवोचन्।

अयमृषिवरकालप्राप्त
सत्त्वार्थसारमद्वयनीरतस्य द्रष्टुम्।
अस्माभिरस्थीण्यपरिमित
गुणश्रितस्य तत्साधु घाटय॥ १॥

अथ भगवान्सहस्रारचक्रचरणविलिखिततलेन स्थूलितनवकमलकोमलेन पाणिना धरणीतलं जघान व्याहतमात्रेण षड्विकारं पृथिवी चचाल। मणिकेन करजातविकृतं च स्तूपं ततोऽभ्युज्जगाम। अथ भगवानायुष्मन्तमानन्दमामन्त्रयते स्म। विघाटयानन्देमं स्तूपम्। अथायुष्मानानन्दो भगवते प्रतिश्रुत्य स्तूपं विघटयामास। स तत्र ददर्श कनकविसृतमुक्तासंछादितं हिरण्यमयं समुद्रकम्। दृष्ट्वा च भगवन्तमेतदवोचत्। हिरण्यमयं भगवन्समुद्रकः समुद्धृतः। भगवानुवाच। सप्तैते समुद्रकान्सर्व उद्घाटनीयाः। तदोद्घाटयामास। स तत्र ददर्श हिमकुमुदसदृशान्यस्थीनि। दृष्ट्वा च भगवन्तमेतदवोचत्। भगवन्नस्थीन्युपलक्ष्यन्ते। भगवानाह। आनीयतामानन्द महापुरुषस्यास्थीनि॥

अथायुष्मानानन्दस्तान्यस्थीन्यादाय भगवते बुद्धायोपनामयामास। भगवांश्चास्थीनि गृहीत्वा संघस्य पुरतः संस्थाप्योवाच। इमान्यस्थीनि महाप्रवरगुणामुक्तस्य समन्तदमध्यानक्षान्तिप्रवरदृढोत्साहयशःसंस्कृतो भूयः सततसमितं बोधौ मतिमतो दृढोत्साहिनो धृतिमतः सदादाननिरतस्य। ततो

भगवान्भिक्षूनामन्त्रयामास। वदन्त भिक्षवो बोधिसत्त्वशरीराणि शीलगुणवासितानि परमदुर्लभदर्शनानि पुण्यक्षेत्रभूतानि। ततस्ते भिक्षवः कृतकरपुटा आवर्जितमनसस्तानि शरीराणि मूर्ध्ना वन्दन्ते स्म॥

अथायुष्मानानन्दः कृतकरपुटो भगवन्तमेतदवोचत्। भगवानतीतानागतप्रत्युत्पन्नसर्वलोकाभ्युद्गतः सर्वसत्त्वैर्नमस्कृतः तत्कथं तथागत एवैतान्यस्थीनि नमस्यते। अथ भगवानायुष्मन्तमानन्दमेतदवोचत्। वन्दनीयानीमान्यस्थीन्यानन्द। तत्कस्य हेतोः। एभिरानन्दास्थिभिर्मयैवं क्षिप्रमनुत्तरा सम्यक्संबोधिरभिसंबुद्धेति। भूतपूर्वमानन्दातीतेऽध्वन्यनेकधनधान्यवाहनबलोपपन्नोऽप्रतिहतबलपराक्रमो महारथो नाम राजाभूत्। तस्य देवकुमारसदृशास्त्रयः पुत्रा बभूवः। महाप्रणादो महादेवो महासत्त्वाश्चेति। अथ राजा क्रीडनार्थमुद्यानमभिनिष्क्रमते स्म। ते च कुमारास्तस्योद्यानस्य गुणानुराधितया कुसुमलोलया चेतस्ततोऽनुविचरमाना महाद्वादशवनगुल्मं प्रविविशुः। तेषु प्रसृतेषु कुमारोपस्थायका अन्योन्यप्रसृता बभूवुः। राजकुमारोत्सृष्टा उद्यानमहत्यामलक्षितायां तं द्वादशवनगुल्मं प्रविविशुः। अथ महाप्रणादो भ्रातृद्वयमुवाच। भीर्मे हृदयमाविशते। आगच्छत मा वयं श्वापदे विनाशमापद्येम। महादेव उवाच। न मे भयमस्त्यपि त्विष्टजनवियोगाद्धि मे हृदये प्रवर्तते। महासत्त्व उवाच॥

न च मम भयमिहास्ति नापि शोको
वनवरे मुनिजनसंस्तुते विविक्ते।
परमसुविपुलमहार्थता लाभा
हृदयमिदं मम संप्रपुष्पति च॥ २॥

अथ ते राजकुमारास्तद् द्वादशवनगुल्मविवरं चङ्क्रूर्यमाणा एकां व्याघ्रीं ददृशुः सप्ताहप्रसुतां पञ्चसुतपरिवृतां क्षुत्तृषपरिकर्षितां परमदुर्बलशरीरां दृष्टा महाप्रणादोऽब्रवीत्। भो कष्टमियं तपस्विनी षडहप्रसुता वा सप्ताहप्रसुता वा भविष्यति। इदानीं भोजनमलभमाना स्वसुतानि भक्षयिष्यति जिघत्सया वा कालं करिष्यति। महासत्त्व उवाच। किमस्यास्तपस्विन्या भोजनम्। महाप्रणाद उवाच।

मांसोष्णानि रूधिराणि रससंकाशं भवेद्यदिह।
एतद्भोजनमुक्तं व्याघ्रतरक्ष्वृक्षसिंहानाम्॥ ३॥

महादेव उवाच। इहैषा तपस्वीनी क्षुत्तुषपरीतशरीरा अलं प्राणावशेषा परमदुर्बला न शक्यमन्यस्थाने भोजनमन्वेष्टुम्। कोऽस्याः प्राणपरिरक्षणार्थमात्मपरित्यागं कुर्यादिति। महाप्रणाद उवाच। भो दुष्कर आत्मपरित्यागः। महासत्त्व उवाच।

अस्मद्विधान् दुष्कर शरीर
अभियुक्तानां एष नयः।
अन्येषां परहिताभियुक्तानां
सत्पुरुषाण न दुष्करः॥ ४॥

अपि च।

कृपाकरुणममवतारिय
सत्त्वो दिवि चेह लभ्यते सः।
स्वदेह शतश इह कृत्व
मुदितमनाः परजीवशरीरे॥ ५॥

अथ ते राजकुमाराः परमसंदीप्ता एषा व्याघ्रीति द्रुतमनिमिषिमनुनिरीक्षन्तः प्रचङ्क्रमुस्ततो महासत्त्वस्यैतदभूत्। अयमिदानीमात्मपरित्यागस्य कालः। कुतः -

सुचिरमपि ऋतोऽयं पूतिकायो महार्हैः
शयनवसनान्नैर्भोजनैर्वाहनैश्च।
श्तनयकृतधर्माभिदनान्तैरनन्तं
न विजहति अनुपूर्वं स्वस्वभावं कृतघ्नुः॥ ६॥

अपि च।

नास्ती तस्योपजीव्यं सर्वतु
मध्ये भुतत्वात्तं नियोज्य।
तस्मै जरामरणस्य समुद्र-
उत्तरणपोतभूतु भविस्सम्॥ ७॥

अपि च।

त्यक्त्वाहं पुण्ड्रभूतं
भवशतभरितं विष्टान्तः पूर्णम्।

निःसारफेनकल्पं कृमिशत-
भरितं कार्यकृत्यं तनु हि ॥ ८ ॥

निःशोक निर्विकारं
निरुपधिममलं ध्यानप्रज्ञादिगुणैः।
संपूर्णं धर्मकाय गुणशत -
भरितं प्राप्स्येव सुशुद्धम्॥ ९ ॥

स खल्वेवं कृतव्यवसायः परमकरुणोपरिगतहृदयः तयोर्विक्षेपं चकार। गच्छेतां तावद्भवन्तौ स्वकार्येणाहं द्वादशवनगुल्मं प्रवेक्ष्यामीति ॥

अथ स महासत्त्वो राजकुमारः तस्मादुपवनात्प्रतिनिवृत्य व्याघ्रया आलयमुपगम्य वनलतायां प्रावरणमुत्सृज्य प्रणिधानं चकार। एषोऽहं जगतो हितार्थमनुत्तरां बोधिं विबुध्य शिवां कारुण्या-त्प्रददामि निश्चलमतिर्देहं परैर्दुस्त्यजम्। तन्मे बोधिरनामया या जिनसुतैरभ्यर्चिता निर्ज्वला त्रैलिक्यं भवसागरात्प्रतिभयादुत्तारयेयान्माम्। इत्यथ व्याघ्रया अभिमुखं महासत्त्वः प्रपतितः। ततो व्याघ्री मैत्रीवतो बोधिसत्त्वस्य न किञ्चिच्चक्रे। ततो बोधिसत्त्वो दुर्बलावर्तोऽयमथेत्युत्थाय शस्त्रं पर्येषते स्म। कृपामतिर्न क्वचिच्छस्त्रमलभत्। सोऽतिबलां वर्षशतिकां वंशलतां गृहीत्वा तया स्वबालमुत्क्षेप्य व्याघ्रीसमीपे पपात। प्रपतितमात्रे च बोधिसत्त्वे भूमिरियं प्रचरविहीनेव नौः सलिलमध्ये गता षड्विकारं प्रचचाल। राहुग्रस्त इव दिनकरकिरणो न बभ्राजे। दिव्यगन्धचूर्णसंनिश्रितं च कुसुमवर्षं पपात। अथान्यतरा विस्मया वर्जितमनसा देवता बोधिसत्त्वं तुष्टाव ॥

यथा कारुण्यं ते विसृतमिह सत्त्वेषु सुमते
यथा वै तद्देहं त्यजसि नरवीर प्रमुदितः।
शिवं श्रेष्ठं स्थानं जननमरणार्थे विरहितं
निरायासं शान्तं त्वमिह न चिरात्प्राप्स्यसि शुभम्॥ १० ॥

अथ खलु सा व्याघ्री रुधिरम्रक्षितशरीरं बोधिसत्त्वमवेक्ष्य मुहूर्तमात्रेण निर्मांसरुधिरमस्थ्यवशेषं चकार ॥

अथ महाप्रणादस्तं भूमिकम्पमनुनिशम्य महादेवमेतदवोचत्॥

प्रचलित ससमुद्रा सागरा
वसुमतिदशदिक्षू सुस्तरश्मिश्च सूर्यः।
पतति कुसुमवर्षं व्याकुलं वा मनो मे
स्वतनुरिह विसृष्टः सांप्रतं भ्रातृणा मे॥ ११॥

महादेव उवाच।

यथा च सो करुणवचो ह्यवोचत
समीक्ष्य तां स्वतनायभक्षणोद्यतां।
क्षुधान्वितां व्यशनशतैः समन्वितां
सुदुर्बला मतिरिह संशया तु मे॥ १२॥

अथ तौ राजकुमारौ परमशोकाभिभूतौ वाष्पपरिप्लुताक्षौ तमेनं पन्थानं प्रतिनिवृत्य गच्छन्तौ व्याघ्रीसमीपमेवाभिजग्मतुः। तं ददृशतुः शतं वंशलतासमायुक्तं प्रावरणं कृष्णविकृष्णानि चास्थीनि रुधिरकर्दमानि। नानादिग्विदिक्षु केशान्विस्तीर्णान्दृष्ट्वा च समूर्च्छन्नौ भूमौ निपेततुः। सचिरात्संज्ञामुपलभ्योत्थायोच्चैयबाहू आर्तस्वरं मुमुचतुः।

अहो प्रियभ्रातृक पार्थिवायं
तथा जननी सुतवत्सला या
पृच्छिष्यते सा जननी तृतीयः
क्व वा युवाभ्यां कमलायतेक्ष्णः॥ १३॥

अहो हि अस्माकमिहैव शोभितं
ननू प्रदेशे मरणं न जीवितम्।
कथं महासत्त्वविवर्जिता वयं
दास्यामहे दर्शनमम्बतातयोः॥ १४॥

अथ तौ राजकुमारौ बहुविविधकरुणं विलाप्य प्रचक्रमतुः। तत्र कुमारस्योपस्थायका दिशि विदिशि प्रधावन्तः कुमारान्वेषणाः परस्परं दृष्ट्वा च पप्रच्छुः क्व कुमारः क्व कुमार इति। तस्मिंश्च समये देवी शयनतलगता प्रियविप्रयोगसूचकं स्वप्नं ददर्श। तद्यथा स्तनौ छिद्यमानौ दन्तोत्पातनं च

क्रियमाणं त्रयः कपोतशावकाः प्रतिलम्भमानास्ते भीता एव श्येनेनाच्छिद्यमानाः। अथ देवी भूमिकाम्पादुत्रस्तहृदया सहसा प्रतिविबुध्य चिन्तापरा बभूव ॥

किमेषा भूतधात्री जलनिधिवसना कम्पति भृशं
सूर्यः शूली न रश्मिर्मम च किच भूभजं वयति वा।
दुःखं कुर्वीति मे गात्रं चलति च नयनं स्वस्तनं छिद्यती च।
स्वस्ति मे स्यात्सुतानां वनविवरमिदं क्रीडनार्थं गतानाम्॥ १५॥

अथैवं चिन्तयन्त्याश्चेटी च संत्रस्तहृदया प्रविश्य देव्या निवेदयामास। देवि कुमारपरिचारकाः कुमारमन्वेषन्ते नष्टः श्रूयते। तत्र पुत्रहतश्रवणाच्च देवी संकम्पिताहृदया वाष्पाकुलनयनवदना राजा-नमभिगम्योवाच। देव नष्टो मे प्रियसुतः श्रूयते। राजापि संकम्पितहृदयः परमसंत्रासमापेदे। हा कष्टं वियुक्तोऽस्मि प्रियसुतेन। अथ राजा देवीमाश्वासयामास। मा भीर्देवि पुत्रार्थं वयं कुमारान्वेषणो-पलभन्तः। तत्र प्रवृत्ते कुमारान्वेषणाभिद्रुते जनकाय अथाचिरादेव राजा ददर्श दूरत एवागच्छन्तौ राजकुमारौ। दृष्ट्वा राजाब्रवीत्। एतावालभन्तौ कुमारौ न तु सर्वे। हा कष्टं सुतवियोगो नाम।

न भवति निरुपलम्भे न प्रीतिरेवं नराणां
भवति सुतवियोगाद्यादृशं दौर्मनस्यम्।
ननु वरसुखिनस्ते येन पुंसाभियोगा
मरणमुपगता वा ये न जीवन्ति पुत्राः॥ १६॥

अथ देवी परमशोकाभिभूता मर्महन्तेव कलभी आर्तस्वरमुवाच॥

यदि तनयास्त्रयस्य भृत्यवर्गा
वनवरे कुसुमाकुले प्रविष्टाः।
क्व स हृदयसमो समस्तृतीयः
सुतमनयापदवैति कनीयसमेतत्॥ १७॥

तयोरागतयो राजा पुत्रावेतत्पर्यपृच्छतोत्सुकः कुमारौ परिपृच्छति स्म। क्व दारकः कनीयस इति। ततः शोकार्तावश्रुद्रुतनयनौ परिशुष्कताल्वोष्ठदशनवदनौ न किञ्चिदूचतुः॥ देव्युवाच॥

कथयतां लघु विमुह्यति स्मृतिश्च
परमभृशं परिपीड्यते च देहः।
क्व स मम पुत्रस्तृतीय हृदयं
इदं स्फुटितं तु संमूर्च्छति वा ॥ १८ ॥

अथ तौ कुमारौ विस्तरेण तं वृत्तान्तं निवेदयामास। सहश्रवणेन राजा देवी परिजनाश्च मोहमुपगताः। मोहप्रत्यागताश्च करुणार्तस्वरं रोदमानास्तं देशमभिजग्मुः। अथ राजा देवी च तण्य-स्थीन्यपगतरुधिरमांसानि वायुना दिशो विदिशश्च केशविकीर्णा दृष्ट्वा चाहर इव द्रुमो भूमौ निपतितौ। ततः पुरोहितः सुचिरं तामवस्थां दृष्ट्वा सलिलमलयचन्दनपङ्कै राज्ञो देव्याश्च शरीरं प्रह्लादयामास। अथ सुचिरात्संज्ञामुपलभ्य राजोत्थाय करुणकरुणं विललाप ॥

हा कष्टं पुत्र क्व मनोरस दर्शनीय
मृत्योर्वशं शीघ्रमुपगतासि।
मृत्योः प्रश्नममेव हि चागतो
विना ते परं मम भविष्यति दुःखमन्यत् ॥ १९ ॥

देवी च मोहात्यागता प्रकीर्णकेशी बाहुभ्यामुरस्ताडयन्ती स्थान्यां प्लुत इव मत्स्या धरण्यास्तले परिवर्तमाना महिषीव नष्टवत्सा कलभीव नष्टशावका करुणकरुणं रोदिति ॥

हा कान्त प्रियसुत केन व्रजसे भग्नो
ऽयं पद्मो धरणीतले हि विकीर्णः।
शत्रुणा मम भुवि केन नाशं गतोऽद्य
पुत्रो मे नयनमनोहरचन्द्रः
हा किं शरीरमिह अद्य न याति भग्नं
पश्यामि हं सुतवरं निहतं पृथिव्याम् ॥ २० ॥

संव्यक्तं हृदयमयो ममैतं
धिग्व्यसनं अवेक्ष्य नो चेद्भेदयते।
हा चैतत्पापकं स्वप्नफलं
यच्छिन्नाविमावद्य केनचिदसिना।

स्वप्नान्तरे द्वौ स्तनौ दंष्ट्रोत्पाट्य
मे प्रियसुतो नाशं गतः शीघ्रमतः ॥ २१ ॥

स श्येनेनापहृतो
यथैव इह मे लब्धैः कपोतैस्त्रिभिः ।
सो मेऽद्य त्रिभिरात्मजैः
परिवृत एको हतो मृत्युना ॥ २२ ॥

अथ राजा देवी च बहुविधं करुणकरुणं परिदेवतस्तयोः सर्वभरणान्यवमुच्य महता जनकायेन सार्धं पुत्रस्य शरीरपूजां कृत्वा तस्मिन्पृथिवीप्रदेशे सुवर्णमयचैत्येषु न्यस्तानि तानि शरीराणि ॥

स्यात्ते खलु पुनरानन्दान्यः स तेन कालेन तेन समयेन महासत्त्वो नाम राजकुमारोऽभूत्। नैवं द्रष्टव्यम्। तत्कस्य हेतोः। अहं स तेन कालेन तेन समयेन महासत्त्वो नाम राजकुमारोऽभूत्। तदापि मयानन्द राजद्वेषमोहापरिमुक्तेन नरकादिभ्यश्च दुःखेभ्यः कृपया जगदनुगृहीतम्। किं खलु पुनरिदानीं सर्वदोषापगतेन सम्यक्संबुद्धेनेति। एवं ह्येकैकस्य सत्त्वस्यार्थे कल्पं समुदेयं नरकेषु जातिं संसारा-द्विमोचयेयम्। खलु सत्त्वसारैश्च जगत्परिगृहीतं दुष्करमनेकविधविचित्रमिति ॥

अथ भगवांस्तस्यां वेलायामिमा गाथा अभाषत ॥

बहूनि कल्पानि मयात्मा त्यक्तः
पर्येषयेता इममग्रबोधिम्।
यथासि राजा यथ राजपुत्रम्
तथैव त्यक्ता मय आत्मभावाः ॥ २३ ॥

अनुस्मरमि पुरिमासु जातिषु
महारथो नाम बभूव राजा ।
तस्यापि पुत्रौ महात्यागवन्तो
नाम्ना महासत्त्व वरो बभूव ॥ २४ ॥

द्वौ तस्य आसीदथ भ्रातरौ च
नाम्ना महादेव महाप्रणादः ।

वनखण्ड गत्वा व समानगोत्रै-
स्तैर्दृष्ट व्याघ्री क्षुधयाभिभूता ॥ २५ ॥

तस्याग्रसत्त्वस्य कृपाभिजाता
यन्नून हं आत्म त्यजेय मांसम् ।
एषा हि व्याघ्री क्षुधतर्षपीडिता
खादीय एतानि स्वकात्मजानि ॥ २६ ॥

पतितश्चासीत्तदा स
महारथसुतो महासत्त्वः ।
दृष्ट्वा च व्याघ्रीं
क्षुधार्तां व्याघ्रसुतमोक्षार्थम् ॥ २७ ॥

करुणामये पतितेऽत्र कम्पित सशैल धरणी
विद्रुत पक्षिसंघ विविधानि ।
संत्रस्तो मृगसंघस्तदाकुल -
संस्थितोऽभूल्लोकोऽयम् ॥ २८ ॥

द्वौ तस्य भ्रातरौ च
महाप्रणादस्तथा महादेवः ।
न लभेते महासत्त्वं दृष्ट्वा
तत्र महावनखण्डेऽस्मिन् ॥ २९ ॥

अतिशोकशल्यहृदया
विचरन्ति वनान्तरे विसंज्ञाश्च ।
पर्येषन्ति भ्रातरमश्रुमुखानि
विचरन्ति वनमध्ये ॥ ३० ॥

उभौ तौ राजकुमारौ
महाप्रणादस्तथा महादेवः ।

तत्रोपसंक्रमित्व यत्र व्याघ्री
सुदुर्बला शयिता व्याघ्रीसुता ॥ ३१ ॥

दृष्ट्वा रुधिरलिप्ताङ्गानि
केशास्थिचर्ममात्रं धरण्याम् ।
अवकीर्ण पतितानि यत्किञ्चिन्मात्रं
तस्य पतितं धरणीयं पश्यन्ति ॥ ३२ ॥

उभौ तौ नृपसुतौ संमूर्च्छितौ हि
तत्र पतन्ति धरणीयम् ।
नष्टमनाः सर्वपाण्डु रजोलिप्तगात्राः
स्मृतीन्द्रियविहीनमूढचित्ताश्च । ३३ ॥

तेषां चो पार्षद्याः
करुणस्वररोदमानशोकार्त्ताः ।
सिञ्चन्ति ते जलेनोत्थितो -
र्ध्वबहवश्च क्रदन्तः ॥ ३४ ॥

तस्मिन्पतितमात्रेण सान्तर्जने
विप्रियाग्रमहिषी च ।
पश्यति पञ्चस्त्रीशतेभी
राजकुलान्तर्गता सुखप्रविष्टकाया ॥ ३५ ॥

ताभ्यां स्तनाभ्यां
क्षीरप्रमुक्तं प्रस्रवन्त्य वेगैः ।
सर्वाङ्गमस्या हि
सूचीभिरिव भिद्यमानापि ॥ ३६ ॥

अतिशोकघूर्णहृदया
पुत्रवियोगार्त्तशोकशरविद्धा ।

उपसंक्रमित्व नृपतिं
सुदीनमनसा अतिशोकसंतप्ता ।
करुणस्वरं रोदमान
राज्ञोऽथ महारथस्यैवावोचत् ॥ ३७ ॥

शृणु मम नृपते नरेन्द्र
शोकाग्निना मम दह्यते शरीरम् ।
उभाभ्यां स्तनमुखाभ्यां
क्षीरप्रमुक्तमचिरेण ॥ ३८ ॥

सूचीभिरिवाङ्गमङ्गं पीडयन्ति
स्म तानि मम हृदयं च ।
यथा निमित्तं यादृश न भूय
पश्यामि दर्शनं प्रियसुतान ॥ ३९ ॥

पुत्राणां मे विजान ददाहि
मम जीवितं क्षेमं कुरुष्व ।
स्वप्नो मया दृष्टस्त्रयो
मम कपोतसुतानि
योऽस्य तृतीयमहं
कपोतसुतं प्रियमना ॥ ४० ॥

श्येनस्तत्र प्रविष्टः श्येनेनापहृतं
कपोतकं च स्वप्नान्तरे च ।
मम ईदृश शोकं
प्रविष्टिं हृदयेऽस्मिन् ॥ ४१ ॥

अतिदाहशोकचिन्ता
मरणं मम भविष्यति न चिरेण ।
पुत्राण मे विजान
ददस्व मम जीवितं भवान्स्वकारुण्यम् ॥ ४२ ॥

एवमुक्त्वाग्रमहिषी संमूर्च्छीत पतति तत्र धरणीये
स्मृतीय परिहीना विनष्टचित्ता विसंज्ञमना।
सर्वान्तःपुरणाश्च करुणस्वरं
रोदमानाः क्रन्दन्तः॥ ४३॥

दृष्ट्वा तामग्रमहिषीं
संमूर्च्छितपतितां च तत्र धरणीये।
समनन्तरशोकार्त्तः
पुत्रवियोगः सामात्यो राजेन्द्रः।
अमात्याश्च प्रयुक्ता जिज्ञासार्थं
गताः कुमाराणाम्॥ ४४॥

सर्वनगरान्तर्जना
नानाशस्त्रगृहीतोत्थिताः।
तथा आगताश्चाश्रुमुखा रोदमानाः
पृच्छिन्ति पथेषु तं महासत्त्वम्॥ ४५॥

किं जीवितो वां क्व गतः
सांप्रतं महासत्त्वः किं द्रक्ष्याम्यहमद्य।
मनापं सत्त्वदर्शन प्रियमनापं
न चिरेण विनष्टश्रमम्॥ ४६॥

सशोकवदनः प्रयाति विषये
ऽस्मिन्दारुणनिर्दनाकरः।
अनन्तायाससंकटानि घोषः
राजा महारथोत्थाय रोदमानः॥ ४७॥

शोकार्त्तः सिञ्चति सलिलधारैः
अग्रमहिषीं च धरणीये पतन्तीं।
सिञ्चति उदकेन यावत्स्मृतिं लभ्यते
उत्थाय पृच्छिरं दीनमानसा॥ ४८॥

किं मम पुत्रा हि मृता जीवन्ति
राजा महारथश्चाग्रमहिषीं च ।
एवमेवावोच दिशि विदिशासु
अमात्या पार्षद्या जिज्ञासार्थं गताः ॥ ४९ ॥

कुमाराणां मा त्वमतिदीनमानसा
भवा हीनायास शोकहृदया ।
एवं महारथश्च क्षमापयित्वा
तदाग्रमहिषीं च कम्पो निष्क्रमे ॥ ५० ॥

राजकुलतोऽथाश्रुमुखो रोदमानः
शोकार्त्तः अमात्यगणपरिवृत्तः ।
सुदीनमनसाथ दीनचक्षुश्च
निष्क्रम्य नगरपुरतो जिज्ञासार्थाय ॥ ५१ ॥

राजा पुत्राणां बहुप्राणिनः
अश्रुमुखो रोदमानो धावति ।
निर्गतं दृष्ट्वा राजानं पृष्ठतः
समनुबुद्धोऽथ समनन्तरनिष्क्रान्तः ॥ ५२ ॥

राजा स महारथः समनन्तरा-
त्प्रियपुत्रदर्शनार्थं प्रेक्षति ।
दिशतां सुगौलनयनो
दृष्ट्वान्यतरं पुरुषं मुण्डितशीर्षं च ॥ ५३ ॥

रुधिरालिप्ताङ्ग पांशुलशरीरं
अश्रुमुखं रोदमानं गच्छन्तम् ।
दारुणशोकार्त्तः महारथस्य
हृदयस्थोऽश्रुमुखो रोदमानः ॥ ५४ ॥

स्थित ऊर्ध्वबाहुश्च क्रन्दन्तः
अथान्यतमोऽमात्यस्त्वरागत्य ।
शीघ्रभारादुपसंक्रम्य नृपते
राज्ञो महारथस्य आवच्चिंसु ॥ ५५ ॥

मा शोकचित्तस्त्वं भव नृपते
तिष्ठन्ति ते पुत्राः प्रियमनापाः ।
न चिरेणागम्य इह तवान्तिके
द्रक्ष्यसि त्वं पुत्रवरं मनापम् ॥ ५६ ॥

मुहूर्तमात्रमभिगम्य - - राज्ञो
द्वितीयोऽमात्य आगतस्ततः ।
रजोऽवकीर्णो मलवस्त्रप्रावृतः
साश्रुमुखो राजानमिदमब्रवीद् ॥ ५७ ॥

द्वे च ते पुत्रे महानृपेन्द्र
तिष्ठतः शोकानलसंप्रदीप्तौ ।
एकस्तवो पुत्रवरो न दृश्येत नृप
ग्रस्तो महासत्त्व अनित्यतया ॥ ५८ ॥

दृष्ट्वा च व्याघ्रीमचिरप्रसुतां
स्वीयाञ्च पुत्रानुपभोक्तुकामाम् ।
तेषां महासत्त्व वरकुमारो
महान्त कारुण्य बलं जनेत्वा ॥ ५९ ॥

बोधौ च कृत्वा प्रणिधिमुदारां
सर्वांश्च सत्त्वानिह बोधयिष्ये ।
तं बोधिं गम्भीरमुदारमिष्ट्वा
अनागतेऽध्वनि अहं स्पृशेयम् ॥ ६० ॥

पतितो महासत्त्वो गिरि तटतु
सोऽग्रे स्थितो व्याघ्रयः क्षुधाभिभूतायाः।
मुहूर्त निर्मासकृतः स अङ्गं च
अस्थावशेषं कृतः राजपुत्रः॥ ६१॥

एवं च श्रुत्वा स वचः सुधारें
संमूर्च्छितो राज महारथश्च।
पतितश्च धरणीय विनष्टचित्तः
शोकाग्निना प्रज्वलितः सुदारुणा॥ ६२॥

आमात्यपार्षद्य करुणास्वररोदमाना
शोकार्त सिञ्चन्तिते जलेन।
सर्वे स्थिता ऊर्ध्वबाहुश्च स कन्दमानाः
तृतीयोऽमात्यो नृपमब्रवीत्॥ ६३॥

दृष्टौ मयाद्य उभौ कुमारौ
समुच्छतौ तत्र महावनेऽस्मिन्।
पतितौ धरण्यां च विनष्टचित्तौ
अस्माभिरुदकेन च सिञ्चितानि॥ ६४॥

यावत्स्मृतिं लभ्यते पुनः स्थितौ हि
आदीप्त पश्यन्ति दिशश्चतस्त्रः।
मुहूर्त तिष्ठन्ति पतन्ति भूमौ
कारुणस्वरेण परिदेवयन्ति॥ ६५॥

ता ऊर्ध्वबाहु सततं स्थिहन्ति
वर्णमुदीरन्तयोर्भ्रातरस्य
स चैव राजा हृदि दीनचित्तः
पुत्रवियोगात्सुविक्षिप्तचित्तः॥ ६६॥

शोकप्रविद्धः परिदेवयित्वा
एवं हि राजा परिदेवयन्ति।
एकश्च मे पुत्र प्रियमनापः
ग्रस्त कनिष्ठो वनराक्षसेन॥ ६७॥

मा मे इमौ अन्य च द्वौ हि पुत्र
शोकाग्निना जीवितसंक्षयं व्रजेत्।
यन्नून हं शीघ्र व्रजेय तत्र
पश्येय पुत्रौ प्रियदर्शनौ तौ॥ ६८॥

शीघ्रेण यानेन च राजधानीं
प्रवेशयेद्राजकुलान्त शीघ्रम्।
मा एषा मातुर्हि जनेतु कामं
शोकाग्निना तद्धृदय स्फटे तत्॥ ६९॥

पुत्रौ च दृष्ट्वा लभते प्रशान्तिं
न जीवितेनालभते वियोगम्।
राजापि चामात्यगणेन सार्धं
द्विपाभिरूढो गत तत्र दर्शितु॥ ७०॥

दृष्ट्वा च पुत्रौ भ्रातृनामाह्वानौ
करुणास्वरं क्रन्दतौ आत्तमाना।
राजा हि तत्पुत्रद्वयं गृहीत्वा
प्ररोदमानोपि पुरं व्रजित्वा।
सा शीघ्रशीघ्रं त्वरमान स्वपुत्रां
देवीं अदर्शेत्सुतपुत्रकामाम्। ७१॥

अहं च स शाक्यमुनिस्तथागतः
पूर्वं महासत्त्ववरो बभूव॥
पुत्रश्च राज्ञो हि महारथस्य
येनैव व्याघ्री सुखिता कृतासीत्॥ ७२॥

शुद्धोदनो हि वरपार्थिवेन्द्रो
महारथो नाम बभूव राजा।
महिषी च आसीद्वरमायदेवी
महाप्रणादस्तथ मैत्रियोऽभूत्॥ ७३॥

महादेवी आसीदथ राजपुत्रो
मञ्जुश्रीरभूद्वीरकुमारभूतः।
व्याघ्री अभूत्तत्र महाप्रजापती
व्याघ्रीसुता पञ्चक अमी हि भिक्षवः॥ ७४॥

अथ महाराजा महादेवी व बहुविधकरुणापरिदेवनं कृत्वा भरणान्येवमुच्य महतो जनकायेन सार्धं पुत्रस्य शरीरपूजां कृत्वास्मिन्प्रदेशे तस्य महासत्त्वस्येमे शरीरा प्रतिष्ठापिता अयं सप्तरत्नयमस्तूपः। तत्र देवेन महासत्त्वेनास्यै व्याघ्र्या आत्मभावं परित्यक्तम्। एवं रूपं च प्रणिधानं करुणया कृतम्। इमं मया शरीरस्य परिदेशनाऽनागतेऽध्वनि गणनासमतिक्रान्तैः कल्पैः सर्वसत्त्वानां बुद्धकायं च कारिता। अस्मिन्देशने निर्दिश्यमान अप्रमेयाणां सत्त्वानां सदेवमानुषिकायाः प्रजायाः अनुत्तरायां सम्यक्संबोधौ चित्तमुत्पादितम्। अयं च हेतुरयं च प्रत्ययः। अस्य स्तूपस्येह निदर्शनतायाः। स च स्तूपो बुद्धाधिष्ठानेन तत्रैवान्तर्धानमनुप्राप्त इति॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे व्याघ्रीपरिवर्तो नामोनविंशतितमः॥

# ॥ सर्वतथागतस्तवपरिवर्तः ॥

अथ खलु तान्यनेकानि बोधिसत्त्वशतसहस्राणि येन सुवर्णरत्नाकरच्छत्रकूटस्तथागतस्तेनोपसंक्रान्ताः। उपसंक्रम्य तस्य सुवर्णरत्नाकरच्छत्रकूटस्य तथागरस्य पादौ शिरसा बन्दित्वैकान्ते स्थितानि कृताञ्जलिभूतानि तं सुवर्णरत्नाकरच्छत्रकूटं तथागतमभिष्टवित्सुः ॥

सुवर्णवर्णो जिनत्यक्तकाय
सुवर्णवर्णो व्यवभासिताङ्ग।
सुवर्णवर्णो गिरिवा मुनीन्द्र
सुवर्णवर्णो मुनिपुण्डरीक ॥ १ ॥

सुलक्षणैर्लक्षण भुषिताङ्गं
सुविचित्रव्यञ्जनविचित्रिताङ्ग।
सुविराजितं काञ्चनसुप्रभासं
सुनिर्मलं सौम्यमिवाचलेन्द्रम ॥ २ ॥

ब्रह्मेश्वरं सुस्वरब्रह्मघोषं
सिंहेश्वरं गर्जितमेघघोषम्।
षष्ट्यङ्गवच्चातस्वरनिर्मलेश्वरं
मयूरकलविङ्करुतस्वराजितम् ॥ ३ ॥

सुनिर्मलं सुविमलतेजसुप्रभं
पुण्यं शतलक्षणसमलंकृतं जिनम्।
सुविमलसुनिर्मलसागरं जिनं
सुमेरुसर्वसुगणाचितं जिनम् ॥ ४ ॥

परमसत्त्वहितानुकम्पनं
परमं लोकेषु सुखस्य दायकम्।
परमार्थस्य सुदेशकं जिनं
परिनिर्वाणसुखप्रदेशकम् ॥ ५ ॥

अमृतस्य सुखस्य दायकं
मैत्रीबलवीर्य उपायवन्तम्।
न शक्यं सतगुरवसमुद्रसागरबहुकल्प-
सहस्रकोटिभिरेकैकं तव प्रकाशितुम्॥ ६॥

एतत्संक्षिप्तं मया प्रकाशितं
किं चिद्गुणबिन्दुगुणार्णवोद्भवम्।
यच्च समुपचितपुण्यसंचयं
तेन सत्त्वः प्राप्न्यतु बोधिमुत्तमाम्॥ ७॥

अथ खलु रुचिरकेतुबोधिसत्त्व उत्थायासनादेकांसमुत्तरासङ्गं प्रावरित्वा दक्षिंण जानु मण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणमयित्वा तस्यां वेलायामिमाभिर्गाथाभिरम्यस्तावीत्।

स त्वं मुनीन्द्र शतपुण्यलक्षण
सहस्रश्रीचारुगुणैरलंकृतम्।
उदारवर्णवरसौम्यदर्शन
सहस्ररश्मिरिव प्रसूयते॥ ८॥

अनेकरश्मिज्वलनाकुलप्रभं
विचित्ररत्नाकुलरत्नसंनिभ।
नीलावदाताप्यवकाञ्चनाभं
वैडूर्यताम्रारणस्फटिकाभम्॥ ९॥

न भासते वज्रमिवेन्द्रपर्वतान्
प्रभाविलासाभिरनन्तकोटिभिः।
प्रसीद मे सेन्द्रप्रचण्डभानुना
प्रतप्यसे सत्त्वसुखाचैरैरिति॥ १०॥

प्रसन्नवर्णेन्द्रियचारुदर्शन
आतप्तरूपजनकान्तरूप।

अपूर्ववर्णो विरजो विराजसे
यथैव मुक्तं भ्रमराकुलप्रभम् ॥ ११ ॥

विशुद्धकारुण्यगुणैरलंकृतं
समानमैत्रीबलपुण्यसंचितम् ।
विचित्रपूर्णैरनुव्यञ्जनार्चितं
समाधिबोध्यङ्गगुणैरलंकृतम् ॥ १२ ॥

त्वया हि प्रह्लादकरी सुखंकरी
शुभाकरं सर्वसुखाकरागमम् ।
विचित्रगम्भीरगुणैरलंकृतं
विरोचसे क्षेत्रसहस्रकोटिषु ॥ १३ ॥

विराजसे त्वं द्युमणीरिवांशुभिः
यथोज्ज्वलं त्वं गगणेऽर्कमण्डलम् ।
मेरुर्यथा सर्वगुणैरुपेतः
संदृश्यसे सर्वत्रिलोकधातुषु ॥ १४ ॥

गोक्षीरशङ्खकुमुदेन्दुसंनिभः
तुषारपद्माभसुपाण्डुर प्रभः
दन्तावलिस्ते मुखतो विराजते
सद्राजहंसैरिव चान्तरीक्षम् ॥ १५ ॥

त्वत्सौम्यवक्त्रेन्दुमुखान्तरे स्थितं
प्रदक्षिणावर्त सुकुण्डलीनम् ।
वैडूर्यवर्णैर्मणितोर्णरश्मिभि-
र्विरोचते सूर्य इवान्तरीक्षे ॥ १६ ।

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे सर्वतथागतस्तवपरिवर्तो नाम विंशतितमः ॥

# ॥ निगमनपरिवर्तः ॥

अथ खलु बोधिसत्त्वसंमुच्चया नाम कुलदेवता हृष्टतुष्टा तस्यं वेलायामिमाभिर्गाथाभिर्भगवन्तं तुष्टाव ॥

नमोऽस्तु बुद्धाय सुविशुद्धबोधये
विशुद्धधर्मा प्रतिभामुबुद्धये ।
सद्धर्मपुण्योपगतानुबुद्धये
भवाग्रशून्याय विशुद्धबुद्धये ॥ १ ॥

अहो अहो बुद्धमनक्षतेजसं
अहो अहो सागरमेरुतुल्यम् ।
अहो अहो बुद्धमनन्तगोचरं
औदुम्बरं पुष्पमिवातिदुर्लभम् ॥ २ ॥

अहो अहो कारुणिकस्तथागतः
शाक्यकुलकेतुनरेन्द्रसूर्यः ।
येन दृशं भाषित सूत्रमुत्तमं
सर्वेषु सत्त्वामनुग्रहार्थम् ॥ ३ ॥

शान्तेश्वरः शाक्यमुनिस्तथागतः
सत्त्वोत्तमः शान्तपुरे प्रविष्टः ।
गम्भीरशास्ता विरजा समाधिः
यदनुप्रविष्टो जिनबुद्धगोचरे ॥ ४ ॥

शून्याश्च कायास्तथ श्रावकाणां
विहारशून्या द्विपदोत्तमानाम् ।
ते सर्वधर्माः प्रकृत्या च शून्याः
सत्त्वापि शून्यात्म न जातु विद्यते ॥ ५ ॥

नित्यं च नित्यं च जिन स्मरामि
नित्यं च शोचामि जिनस्य दर्शनम् ।

सततं च नित्यं प्रणिधिं करोमि
संबुद्ध सूर्यस्य च दर्शनार्थम् ॥ ६ ॥

स्थाप्येह नित्यं धरणीषु जानु
अतिशोकतप्तोऽस्मि जिनस्य दर्शने ।
रोदिमि कारुण्यविनायकत्वं
अभिसंतृष्णास्मि सुगतस्य दर्शने ॥ ७ ॥

शोकाग्निना प्रज्वलितोऽस्मि समन्त नित्यं
ददाहि मे दर्शनतोय शीतलम् ।
सत्त्वाः सतृष्णास्तव रूपदर्शने
प्रह्लादयेन्मां करुणोदकेन ॥ ८ ॥

कारुण्यभावं कुरु मह्य नायक
ददाहि मे दर्शन सौम्यरूपं ।
त्वया हि त्राता जगदेव देशितः
शून्याश्च कायस्तथ श्रावकाणाम् ॥ ९ ॥

आकाशतुल्या गगणस्वभावा
मायामरीच्युदकचन्द्रकल्पा ।
सर्वे च सत्त्वाः सुपिन स्वभावा
महान्तशून्याः स्वय नायकस्य ॥ १० ॥

अथ भगवानासनादुत्थाय ब्रह्मस्वरेणावोचत् । साधु साधु ते कुलदेवते शास्ता ददाति साधु ते कुलदेवते पुनश्च साध्विति ॥

इदमवोचद्भगवानात्तमनास्ते बोधिसत्त्वा बोधिसत्त्वसमुच्चयाकुलदेवतासरस्वतीमहादेवीप्रमुखा सा च सर्वावती पर्षत्सदेवमानुषासुरगरुडकिंनरमहोरगादिप्रमुखा भगवतो भाषितमभ्यनन्दन्निति ॥

इति श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे निगमनपरिवर्तो नामैकविंशतितमः ॥

इत्यार्यश्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजः परिसमाप्तः ॥